लघु-ग्रन्थमाला

[५१]

वामनदत्तविरचितः

संवित्प्रकाशः

सम्पादकः

डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

निदेशकः, अनुसन्धानसंस्थानस्य

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

वाराणस्याम्

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

वि० सं० २०५०

LAGHU-GRANTHAMĀLĀ

[Vol. 51]

SAṀVITPRAKĀŚAḤ

OF

VĀMANADATTA

EDITED BY

BHĀGĪRATHA PRASĀDA TRIPĀṬHĪ 'VĀGĪŚA ŚĀSTRĪ'

Director, Research Institute

Sampurnanand Sanskrit University

Varanasi

VARANASI

1993

Research Publication Supervisor —
Director, Research Institute,
Sampurnanand Sanskrit University
Varanasi.

□

Published by—
Dr. Harish Chandra Mani Tripathi
Publication Officer,
Sampurnanand Sanskrit University
Varanasi–221 002.

□

Available At—
Sales Department,
Sampurnanand Sanskrit University
Varanasi–221 002.

□

First Edition, 500 Copies
Price–Rs. 10. 00

□

Printed by—
VIJAY PRESS,
Sarasauli, Bhojubeer
Varanasi,

लघु-ग्रन्थमाला

[५१]

वामनदत्तविरचितः

संवित्प्रकाशः

सम्पादकः

डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

निदेशकः, अनुसन्धानसंस्थानस्य

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

वाराणस्याम्

वाराणस्याम्

२०५० तमे वैक्रमाब्दे १९१५ तमे शकाब्दे १९९३ तमे खैस्ताब्दे

अनुसन्धान-प्रकाशन-पर्यवेक्षकः—
निदेशकः, अनुसन्धान-संस्थानस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी।

□

प्रकाशकः—
डॉ० हरिश्चन्द्रमणित्रिपाठी
प्रकाशनाधिकारी,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी–२२१ ००२.

□

प्राप्तिस्थानम्—
विक्रय-विभागः,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी–२२१ ००२.

□

प्रथमं संस्करणम्, ५०० प्रतिरूपाणि
मूल्यम्— १० = ०० रूप्यकाणि

□

मुद्रकः—
विजय- प्रेस,
सरसौली, भोजूबीर
वाराणसी।

प्रास्ताविकम्

संवित्प्रकाशाख्योऽयं ग्रन्थः काश्मीरिकेण विपश्चिदपश्चिमेन वामनदत्तेन प्राणायि। तेनैतस्मिन् ग्रन्थे सर्वत्र विष्णुरभ्युगतः परमतत्त्वरूपतया। एवं सत्यपि वामनदत्तः सादरं स्मर्यते काश्मीरशैवदर्शनलब्धवर्णैः। प्रत्यभिज्ञादर्शनसूरिणा श्रीमदभिनवगुप्तपादेन स्वकीये 'तन्त्रालोक'-नामके ग्रन्थे (५,१५५) संवित्प्रकाशस्थितश्लोकोद्धरणावसरे तदुक्तिं गुरुभाषिततयाऽङ्गीकृतवता सप्रश्रयं सभाजितो वामनदत्तः। गुरुभाषितशब्दं व्याख्याति तट्टीकाकारो जयरथः—'गुरुभिः = वामनदत्ताचार्येण भाषितमिति संवित्प्रकाशे'।

तन्त्रालोकीये श्लोकान्तरे यत्राभिनवगुप्तपादेन स्वगुरूणां प्रशंसा समुदीर्यते, तत्र तन्मध्ये वामनकाभिधः कश्चिदभिष्टूयते कृतो। पूर्वोद्धरणपरामर्शेन संवित्प्रकाशविभावयिता वामनदत्त एवासौ भवेदिति पार्यते निश्चेतुं यथायथम्। एवं तावदेतस्य जीवनकालो नूनं श्रीमदभिनवगुप्तपादेभ्यः प्राक्तनो दशम्यामाहोस्विदेकादश्यां खोस्तशताब्दयां मन्तव्यः

संवित्प्रकाशस्याद्वयवादे काश्मीरशैवाद्वयशासनस्य स्पष्टं विलोक्यते प्रभावः। आदिशेषकृताधारकारिकाद्वैतवादस्य संवित्प्रकाशाद्वैतवादेन सार्धं विहिते तौल्ये वामनदत्तीयाद्वयवादस्यासाधारणानि लक्षणानि प्रकटीभवन्ति। आदिशेषस्याद्वयवादस्तावदद्वैतवेदान्तानुगुण्यादितो व्यपवृक्तः। यद्यप्यादिशेषमतानुसारेण परतत्त्वं मायेश्वरो विष्णुरूरीक्रियते, तथाप्यसावद्वैतवेदान्तवादीव जगतो मिथ्यात्वमुद्घोषयति। यद्यपि वामनदत्तोऽपि विष्णोः परत्वमामनति, तथापि तन्मतानुसारेण जगतो मिथ्यात्वं नास्ति। एवं सत्यपि तदीयमस्तित्वं वेदकस्यायत्तं तिष्ठति, वेदकेन विना वेद्यस्यासम्भाव्यात्।

वस्तुतस्तु सर्वत्र सदैव वेद्यवेदकैकत्वं चकास्ति। संविदस्तु बहिर्मुखत्वहेतुत्वाद् विकल्पनाशक्तिप्रभावेण वेद्यवेदकभेदः परिलक्ष्यते। विष्ण्वनुग्रहेण यदा कश्चन योगी स्वसंवित्तिं वेदकं प्रत्यन्तर्मुखीं विधाय 'अहं वेदकः' इत्यहंकृतिं परिहरति, तदा विष्णोः शुद्धः संवित्प्रकाशो वेद्यवेदकभेदविनिर्मुक्तो निश्शेषवस्तुषु विश्वरूपेण स्वत आविर्भवति। अतो मिथ्यात्वमबिभ्रतो जगतो विष्णुत्वेनावस्थानं प्रतिपद्यते। एवमपि नानात्वं नास्तीत्यस्माद्धेतोर्विवर्तवादः परिणामवादश्चेति पक्षद्वयं शक्यमभ्युपगन्तुम्। तदुक्तं वामनदत्तेन (१, १०४; १०६)—

अतिनिर्मलबोधैकरूपे देहपरिग्रहः ।
विवर्तपरिणामाभ्यां द्वाभ्यामप्युपपद्यते ॥
विवर्तेऽप्यतथारूपस्तथा भासित्वमच्युत ।
परिणामे स एव त्वं सुवर्णमिव कुण्डले ॥ इति ।

विष्णुश्चित्प्रकाशस्वभावः सर्वेषां वस्तूनां प्रकाशको मतः । तदुक्तं श्वेताश्वतरोपनिषदि (६,१४)—

न तत्र सूर्यो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति ॥ इति ।

विष्णोः प्रकाश्यरूपेणापि विद्यमानत्वादसौ केवलं प्रकाशक एव नास्ति । तदुक्तं संवित्प्रकाशे (१,११)—

तदात्मकत्वं भावानां विवदन्ते न केचन ।
यत्प्रकाश्यदशां यातो नाप्रकाशः प्रकाशते ॥ इति ।

यथा काश्मीरीयाद्वयशैवदर्शनवादिनः शिवस्य प्रकाशात्मकत्वमुद्घोषयन्ति, तथैव वामनदत्तोऽपि प्रतिपादयति विष्णोः स्वरूपम् । तस्माद् वामनदत्तस्य सिद्धान्तः काश्मीरिकशैवदर्शननीकाशो विभाति, न त्वद्वैतवेदान्तसन्निभः । प्रकारान्तरेणापि तदीयस्य सिद्धान्तस्य काश्मीरिकशैवसिद्धान्तसादृश्यमुपपद्यते । तथाहि—विष्णुः स्वातन्त्र्यशक्तिमान् सर्वत्र विश्वस्वरूपतया विजृम्भत इति वादः । यद्यपि पाञ्चरात्रसंहितास्वपि विराजते वाद एषः, तथापि वामनदत्तीयः सिद्धान्तोऽद्वयवादिशैवमतेन सममेव सादृश्यं बिभर्ति ।

वामनदत्तमतानुसारेण विष्णोश्चतुर्व्यूहात्मकस्य प्रमातृमेयमानरूपता वर्तते । अनेन चतुष्कात्मकरूपेण संवित्स्वरूपः परमार्थः सर्वत्र प्रकटो विलसति । अयं वादः खलु काश्मीरशैवदर्शनस्य समाम्नायते । एवमेव महानयसिद्धान्त उररीकृतो वामनदत्तेन । तस्मादसौ महानयस्य परमदेवतां कालकर्षिणीं स्तौति संवित्प्रकाश (४, १२-१३)—

एका सा विविधावस्था चराचरतया स्थिता ।
द्विषट्कपत्त्रं सा पक्षं कालमाधारमाश्रिता ॥
व्यज्यते कलनात् तस्याः कालः कालत्वमागतः ।
सोत्पादक्षयरूपेण भावानां कालकर्षिणी ॥ इति ।

यद्यपि वामनदत्तमतस्य काश्मीरीयशैवमतेन सार्धं नानाविधं सादृश्यमवलोक्यते, तथापि तस्य दर्शने पूर्णाहन्ताभाववादो न विद्यते। अनया दृशा वामनदत्तस्य वादे पाञ्चरात्राद्वयवादविकासस्य जायमानमेकावस्थानं लक्ष्मीतन्त्रानुशीलनाद् विज्ञायते। भूयांसः श्लोकाः संवित्प्रकाशादुद्धृताः सन्ति लक्ष्मीतन्त्रीये चतुर्दशाध्याये। एतेन संवित्प्रकाशाल्लक्ष्मीतन्त्रस्यार्वाचीनत्वं सिध्यति। यद्यपि वामनदत्तेन नाङ्गीकृतः पूर्णाहन्ताभाववादः, तथापि लक्ष्मीतन्त्रेऽसौ सर्वत्र प्रतिष्ठितः। यथोक्तं तत्रैव लक्ष्मीतन्त्रे (२, १२–१३)—

सर्वावस्थागता देवी स्वात्मभूतानपायिनी।
अहन्ता ब्रह्मणस्तस्य साहमस्मि सनातनी॥
आत्मा स सर्वभूतानामहंभूतो हरिः स्मृतः।
अहन्ता सर्वभूतानामहमस्मि सनातनी॥ इति।

अन्यच्चापि (२,१६) तत्रैव—

लक्ष्मीनारायणाख्यातमतो ब्रह्म सनातनम्।
अहन्तया समाक्रान्तो ह्यहमर्थः प्रसिध्यति॥ इति।

श्रीमद्भगवद्गीतादर्शनं संवित्प्रकाशस्य तावदुपजीव्यभूतं विलसति। अत्र 'नासतो विद्यते भाव इत्याद्यादेशतः प्रभो' (१,१११) इत्यत्र, भूमिरापोऽनलो वायुः खं मनो धीरहंकृतिः' (६।५) इत्यत्र च तत्रत्यांश्चरणान् स्पष्टतः समुदलेखीद् वामनदत्तः। परवर्तिनि तन्त्रालोकेऽपीयमेव सरणिरङ्गीकृता लक्ष्यते। सप्तमे प्रकरणे 'यज्ञानां जपयज्ञोऽस्मीत्येतद् गीतासु यच्छ्रुतम्' इत्यत्र तु वामनदत्तेन गीताग्रन्थो नाम्नैव व्याहृतः।

शैवदर्शनस्य कश्चित् प्रभावो यथा केषुचन वैष्णवशास्त्रेषु विलोक्यते तथैव वैष्णवमतस्यापि प्रभावः केषुचित् काश्मीरिकेषु शैवशास्त्रेष्वपि स्पष्टं लक्ष्यते। निरीक्ष्यतां पद्यमिदं भास्कराचार्यविरचितस्य कक्ष्यास्तोत्रस्य—

ज्ञानं प्रशान्तं तव बोधवृत्तिरैश्वर्यमुद्यत्प्रसरा परेषाम्।
प्रकाशनं प्रत्यपि योग्यरूपा भक्तिर्बहिः स्थैर्यवती बलं सा॥
उत्पन्नबाह्यप्रसरा तु वीर्यं तेजश्च बाह्यानवभासयन्ती।
षोढेत्थमेकैव तव स्वशक्तिर्बाह्याविमर्शात् तु भवेदविद्या॥

भास्कराचार्यो यद्यपि वैष्णवमतानुसारी वर्तते, तथाप्यत्रासौ विष्णोः शक्तिवच्छिवस्य शक्तिमपि विवृणोति ज्ञानशक्त्यैश्वर्यबलवीर्यतेजोरूपतया। भगवदुत्पलाचार्यप्रणीतायां स्पन्दप्रदीपिकायां तु वैष्णवमतप्रभावस्य विशेषतो दर्शनं जायते। तत्र

स्थाने स्थाने समुद्ध्रियन्ते संवित्प्रकाशस्य श्लोकाः। यद्यपि भगवानुत्पलाचार्यो वामनदत्तवत् काश्मीरिको ब्राह्मण आसीत्, तथापि स वैष्णववामनदत्तवैसादृश्येन शिवमिष्टदेवतया समाराधयामास। एवं सत्यपि पाञ्चरात्रसंहितानां प्रामाण्यमसौ शैवागमवदेवाङ्गीकुरुते स्म। यथा स्पन्दकारिकासु पूर्णाहन्ताभावो नास्ति, तथैव संवित्प्रकाशमतानुरोधेन तावदहन्ताभावविहीनं परमतत्त्वमुद्घोष्यते।

अस्या वामनदत्तकृतेरियमाविष्क्रिया शैववैष्णववाद्वयवादसंबन्धविषयकं किमपि गवेषणान्तरं नूनं प्रेरयेदिति विभाव्यते। विशेषतो बुधवरैरहिर्बुध्न्यसंहिता लक्ष्मीतन्त्रं च मृगणीये। तान्त्रिकवाङ्मयवदिहापि च्छन्दोभाषादिनियमोल्लङ्घनानि सन्ति भूयांसि।

इदम्प्रथमतया ग्रन्थस्यास्य प्रकाशनसौभाग्यभाग् भवति सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः। प्रकाश्यमानादस्मात् संस्करणात् प्राग् वामनदत्तकृतेरस्याः केचिदेव श्लोकाः समैक्षिषत काश्मीराद्वयशैवशास्त्रेषूद्धृता लब्धवर्णैः। विशेषतस्तु ते समुद्धृताः सन्ति भगवदुत्पलविभावितायां स्पन्दप्रदीपिकायाम्। यद्यपि तत्र तत्र समुद्धृतैस्तैः श्लोकैर्वामनदत्तीयसिद्धान्तवैशिष्ट्यं साकल्येन विज्ञातुं न प्राभवन् सुधियो जिज्ञासुजनाश्च, तथापि संवित्प्रकाशग्रन्थस्य गुरुत्वं तेषामविदितं नातिष्ठत्। एवं तावदसाधारणं महिमानमाबिभ्रतोऽस्य सम्पादनं चिरात् प्रतीक्षितमासीदेव।

तस्यास्य हस्तलेखप्रेप्सया विविधग्रन्थालयसूचीपत्त्रविलोकनप्रसङ्गे काशीहिन्दूविश्वविद्यालयीयपुस्तकालयस्थग्रन्थसूच्यां संवित्प्रकाशस्य मातृकायाः (सी:४००३ संख्याकायाः) दर्शनेन नितरां प्रासीदत् स्वान्तनिशान्तमास्माकम्। इह संस्करणे तस्याः संज्ञा 'B' इति विद्यते। ततः परं ग्नोलीमहोदयद्वारा यस्या अन्यस्या मातृकायाः प्रतिकृतिरासादिता, सा काश्मीरिके श्रीनगरस्थे पुस्तकालये विराजते १९७१ संख्याका। तस्याः संकेत इह 'A' इति संज्ञया विहितोऽस्ति।

ग्रन्थस्यास्यानुसन्धाने प्रतिलिपीकरणे सम्पादने च साहायकं समर्पयन्तं नेपालीयतन्त्रग्रन्थसम्पादनयोजनायां मत्सहायकं मदन्तेवासिनं डॉ० मार्कण्डिच्कोव्स्किमहोदयमाशीराशिभिः सभाजयामि। संवित्प्रकाशस्यास्य प्रकाशनेन विद्वज्जनाः प्रीणयेर्युजिज्ञासुजनाश्च नूनमुपकृता भवेयुरिति ध्रुवं प्रत्येति

सुखरात्रौ २०५० वि०
वाराणस्याम्

भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

विषयसूची

विषयाः			पृष्ठाङ्काः
१. प्रथमं प्रकरणम्	...	....	१—१४
२. द्वितीयं प्रकरणम्	....	....	१५—२१
३. तृतीयं प्रकरणम्	....	....	२२—२८
४. चतुर्थं प्रकरणम्	....	....	२९—३९
५. पञ्चमं प्रकरणम्	....	....	४०—४९
६. षष्ठं प्रकरणम्	....	....	५०—५२
७. सप्तमं प्रकरणम्	....	....	५३

विषयसूची

विषयाः			पृष्ठाङ्काः
१. प्रथमं प्रकरणम्	...	....	१—१४
२. द्वितीयं प्रकरणम्	....	....	१५—२१
३. तृतीयं प्रकरणम्	....	....	२२—२८
४. चतुर्थं प्रकरणम्	....	....	२९—३९
५. पञ्चमं प्रकरणम्	....	....	४०—४९
६. षष्ठं प्रकरणम्	....	....	५०—५२
७. सप्तमं प्रकरणम्	....	....	५३

वामनदत्तप्रणीतः

संवित्प्रकाशः

अथ प्रथमं प्रकरणम्

[1]वेद्यवेदकरूपेण बहिरन्तर्व्यवस्थया ।
भेदप्रधानसंकल्पो विभेदयति तत् तथा ॥ १ ।

न तदन्तर्न तद् बाह्ये न वेद्ये वेदके न च ।
नान्तरे[2] न च मध्येऽपि सर्वथापि तदन्यथा ॥ २ ।

यद् विकल्पैरनाक्रान्तं यच्छब्दैरकदर्थितम् ।
यदुपाधिभिरम्लानं नौमि तद् वैष्णवं पदम् ॥ ३ ।

दूरापास्तविकल्पेन [3]न चेद् [4]मायानुभूयते ।
मध्यमां वृत्तिमास्थाय स संवित्प्रसरोऽमलः ॥ ४ ।

सर्वः स्वरूपं जानाति परो ज्ञेयो न कस्यचित् ।
रूपं स्वं सर्वगं च त्वं त्वयेदं पूरितं जगत् ॥ ५ ।

प्रकाशकानां स्वे रूपे प्रकाश्यत्वं न दुर्लभम् ।
यदनिर्भक्तरूपास्ते स्वरूपस्य प्रकाशकाः ॥ ६ ।

केवलं वाक्यभावोऽयं यदभिन्नमपि स्वयम् ।
विभेदयति [5]तद् वस्तुष्वेति कर्तव्यतावशात् ॥ ७ ।

---

१. ॐ श्रीकृष्णाय नमो नमः श्रीपरमात्मने नमः ॐ श्रीगुरवे नमः । ॐ शिवो जयति ।
२. AB : नान्तरा ।
३. AB : 'न' नास्ति ।
४. AB : मायो ।
५. AB : सा ।

यथा राहोः शिर इति शब्दे भेदो न वास्तवः ।
तथा स्वात्मनि वेद्यत्वभेदशब्दो[१] न वास्तवः[२] ॥ ८ ।

यथा [३]चक्षुः स्थितं रूपं बाह्यं स्वं रूपमीक्षते ।
तथा ज्ञानस्थिता संविद् ज्ञेयं स्वं रूपमीक्षते ॥ ९ ।

यथाग्निना समाविष्टं सर्वं तद् रूपमीक्ष्यते[४] ।
तथा ज्ञानसमाविष्टं सर्वं तद्रूपमीक्ष्यताम्[५] ॥ १० ।

[६]प्रमातृपक्षाभावेषु नह्यवस्थावकल्पते ।
यतस्ततः प्रकाशस्ते[७] स्वयमेव तदात्मना ॥ ११ ।

त्वदात्मकत्वं भावानां विवदन्ते[८] न केचन ।
यत्प्रकाश्यदशां [९]यातो नाप्रकाशः प्रकाशते ॥ १२ ।

अपरोक्षे भवत्तत्त्वे सर्वतः प्रकटे स्थिते ।
यैरुपायाः प्रतन्यन्ते नूनं त्वां न विदन्ति ते ॥ १३ ।

देशकालक्रियाकारैरवच्छिन्नेषु वस्तुषु ।
अनवस्थितरूपस्त्वं भासि भास्यबहिःस्थितः ॥ १४ ।

त्वया सर्वमिदं व्याप्तं त्वयि सर्वमिदं स्थितम्[१०] ।
भावकश्च त्वमेवास्य सर्वस्य जगतः प्रभो ॥ १५ ।

सर्वेश्वरत्वे सर्वज्ञे सर्वत्वे यैस्तव प्रभो[११] ।
प्रमाणमुच्यते नूनं भवन्तं ते न जानते ॥ १६ ।

मातृत्वं यत्र मानत्वाद् व्यतिरिक्तं न किञ्चन ।
मेयत्वाद् वा जगन्नाथ तत्र कस्येदृशी कथा ॥ १७ ।

---

१. A : श्चाब्दै । २. B : इयं पङ्क्तिर्नास्ति ।
३. A : चसः B : चाक्षः । ४. AB : मीक्षताम् ।
५. AB : इयं पङ्क्तिर्नास्ति । ६. AB : पेक्षा ।
७. A : प्रकाशन्तां B : प्रकाशान्तां । ८. AB : विवदन्ति ।
९. B : याता । १०. AB : स्थितिः । ११. B : इयं पङ्क्तिर्नास्ति ।

कालान्तस्थ[१] महाभूत[२] यथेष्टविनियोजक[३] ।
सर्गेण देहदृष्टस्त्वं यदा सर्वेश्वरस्तदा ॥ १८ ।

सर्वज्ञश्चेतनः संस्त्वं यतः कारणतां गतः ।
सर्वस्याव्यतिरेकेण स्वरूपेणापरिच्युतः ॥ १९ ।

सर्वज्ञः सर्वदैव त्वं सर्वस्य हृदये न चेत् ।
केनान्यथास्य सम्भाव्या नष्टार्थविषया स्मृतिः ॥ २० ।

मनस्संक्षिप्य विषयात् त्वय्यासीनो जितेन्द्रियः ।
यद् यद् विधित्सति तथा तत् तज्जानात्यसंशयम् ॥ २१ ।

ज्ञेयं ज्ञानाद् बहिर्भूतं [४]स्वप्नेऽपि [५]हि न दृश्यते ।
अतस्त्वदात्मकं विश्वं ज्ञानरूपो यतो भवान् ॥ २२ ।

ततः शुद्धचिदात्मत्वाद् विश्वरूपस्त्वमुच्यते ।
परिनिष्ठितरूपं[६] हि कथं रूपान्तरं श्रयेत् ॥ २३ ।

वेद्यं स्वरूपतां नीत्वा यदा जानाति वेदनम् ।
तदानीं वेद्यता का स्यात् का वा वेदनता[७] परा ॥ २४ ।

वेद्यवेदकरूपाभ्यां यच्छून्यं भावकं च यत् ।
तदेव वासुदेव त्वं[८] ततः संवित्समुद्भवः ॥ २५ ।

त्वद्ध्यानामृत[९]निःष्यन्दनिःशेषक्षालिने[१०] नमः ।
सदसद्वासनाक्षीणे[११] आनन्दात्मनि दृश्यते[१२] ॥ २६ ।

निर्मलानन्दबोधैकरूपस्त्वं भव्यबुद्धिभिः ।
वेद्याद् वा वेदकाद् वापि लभ्यसेऽवहितात्मभिः ॥ २७ ।

---

१. AB : कालाष्टम । २. A : महादभूतं । ३. AB : विनियोजकः ।
४. B : स्वपे । ५. A : हि । ६. BA : परिनिष्टतरूपं ।
७. AB : वेदकता । ८. A : त्वां B. त्व । ९. AB : सृत ।
१०. AB : क्षालितं । ११. AB : क्षये । १२. AB : पश्यन्ति ।

तवाचित्रैकरूपस्य वेद्यवेदकतामयी ।
नाथ मिथ्यैव मन्यन्ते सत्यचिन्मात्ररूपिणः ॥ २८ ।

न शान्तमुदितं नापि तव रूपं न मध्यमम् ।
रूपं रूपं तव हरे यन्न केनचिदुच्यते[1] ॥ २९ ।

यदैव विदितं विश्वं तदानीमेव चिन्मयम् ।
यन्नास्ति भागो वेद्योऽसौ नाथ यो वेदकाद् बहिः ॥३० ।

संवित् त्वदात्मा चेत् सत्यं तदिदं त्वन्मयं जगत् ।
वेद्यो वेदकतामाप्तो वेदकः संविदात्मताम् ॥ ३१ ।

विकल्पमूलतादोषाद् भिन्नैः शब्दैर्न तत्कथा ।
चिदभिन्नोऽपि यच्छब्दः कथं तेनापि तत्कथा ॥ ३२ ।

सर्वातीतमतः केन तव [2]रूपं निरूप्यते ।
निरूपणा भवेद् भिन्ने भिन्नश्चात्मा न कस्यचित् ॥ ३३ ।

स च त्वमेव सर्वात्मा[3] ततोऽपि न निरूप्यसे ॥

केवलं निस्तरङ्गेण स्वरूपेण परात्मना[4] ।
परित्यक्तविभागेन ज्ञायसे न विकल्पसे ॥ ३४ ।

विकल्पातीतरूपत्वात् प्रत्यक्षोऽप्यसि विस्मृतः ।
पुरः स्थितो यथा भावश्चेतसो[5]ऽन्याभिलाषिणः ॥ ३५ ।

अविच्छिन्नापि[6] रविभा भावैस्तेभ्यः पृथग् यथा ।
तथा प्रकाश्य सर्वार्थांस्त्वं तेभ्योऽप्यतिरिच्यसे ॥ ३६ ।

सृजन् विदन् ज्ञापयंश्च त्रिधैकस्त्वं प्रकाशकः ।
व्यतिरिक्तः प्रकाशेभ्यो न यथाऽन्ये प्रकाशकाः[7] ॥ ३७ ।

---

१. B : के नदिच्यते । २. AB : रूप । ३. AB : त्मम् ।
४. AB : परात्मनो । ५. AB : श्चेतनात्या, ।
६. AB : अविछिन्नापि । ७. AB : इयं पङ्क्तिर्नास्ति ।

न प्रकाशाः प्रकाशन्ते त्वत्प्रकाशोदयं विना ।
प्रकाशाख्यस्त्वमेकोऽतः सर्वेऽन्ये तमसा समाः ॥ ३८ ।

अखण्डास्ते[1] न भासन्ते विवेको [2]नावतिष्ठते ।
सर्वे समं समाभान्ति[3] चिद्भानावुदिते त्वयि ॥ ३९ ।

अन्धानामप्यनन्धत्वं[4] मूलानामनपायिवाक् ।
अवच्छिन्वन्ति [5]मार्गं तं समः सर्वस्य वेदते ॥ ४० ।

सदैव शुद्धोऽनुभवोऽयं प्रत्याकारकर्बुरः ।
आकारान्तरसंचारकाले तस्यापि निर्मलः ॥ ४१ ।

यथा जात्या सितं वस्त्रं रक्तं रागेण केनचित् ।
[6]तत्पदप्राप्तशुक्लत्वं पुना रागान्तरं[7] श्रयेत् ॥ ४२ ।

अयमुच्चारयन् वाक्यं वर्णाद् वर्णं कथं व्रजेत् ।
यावन्मध्ये न विश्रान्तस्त्वयि शुद्धचिदात्मनि ॥ ४३ ।

एवं शुद्धा चितिर्जात्या[8] यदाकारोपरागिणी ।
तत्त्यागापरसंचारमध्ये शुद्धैव तिष्ठति ॥ ४४ ।

दक्षिणेतरसंचारनिरोधाद् मध्यमाश्रितः ।
अग्नीषोमेश्वरो भावः प्रकाशयति ते पदम् ॥ ४५ ।

धिया देहमनालम्ब्य विषयं चादिशन्नपि[9] ।
यदन्तरा[10] वेदयते तद् रूपं तव निर्मलम् ॥ ४६ ।

निवृत्तविषयेच्छेन त्वद्भक्त्युल्लसितात्मना ।
आस्वाद्यते योऽनुभवः सोऽभ्यासादपवर्गदः[11] ॥ ४७ ।

---

१. AB : अखण्डः रवे । २. AB : यो । ३. AB : समाभाति ।
४. AB : रूचं । ५. AB : यंगं । ६. AB : न तद प्राप्य ।
७. AB : पुनरागान्तरं । ८. AB : चिनिवृत्या । ९. AB : नास्ति ।
१०. A : यदन्तराद, B : नास्ति । ११. B: नास्ति ।

उपरागेऽपि शुद्धत्वं न त्यक्तमनया प्रभो ।
परित्यज्य निजं रूपं संविदाख्या कुतः श्रयेत् ॥ ४८ ।

अथाप्राप्यैव तद् रूपं भवेद् रूपान्तरानुगा ।
तद्रूपा हि च दृश्येत कारणस्यापि संभवात् ॥ ४९ ।

मुखं विना यथादर्शे पृथग् बिम्बो[1] न मन्यते ।
तथा समुद्भृतं ज्ञेयं[2] ज्ञातं न द्वैतपण्डितः[3] ॥ ५० ।

भावैर्विभाव्यतां तेजस्यार्के वेत्ति यथा जडः ।
वेद्यवेदकरूपाभ्यां तथा त्वय्यपि मन्यते[4] ॥ ५१ ।

समुदेति यथा भावान् विना भानुर्नभस्तले ।
वेद्यं विनैव भगवन् भवान् केन हृतोदयः ॥ ५२ ।

अत्यन्ताच्छस्वभावत्वात् स्फटिकस्य यथा स्वकम् ।
रूपं परोपरक्तस्य नित्यमेवोपलभ्यते ॥ ५३ ।

तथा भावसमायुक्तं भगवंस्तावकं[5] वपुः ।
अत्यन्तनिर्मलतया पृथक् तैर्नोपलभ्यते ॥ ५४ ।

नैतावताऽसौ[6] स्फटिकः पृथङ्नास्त्येव रञ्जकात् ।
भावरूपपरित्यक्ता तव वा निर्मला तनुः ॥ ५५ ।

यथोद्धृतविशेषस्य सामान्यस्य निजा[7] स्थितिः ।
पृथङ्न शक्या निर्देष्टुं न च तत्रास्ति तावता ॥ ५६ ।

यथोद्धृतकुण्डलादेः[8] कनकस्य स्वयं स्थितिः ।
[9]एवं नित्या निजा शुद्धा सुखदुःखनिषेधनात्[10] ।
स्वसंवेदनसंवेद्या तव संविन्मयी स्थितिः ॥ ५७ ।

---

१. AB. वालो । २. B : ते यें । ३. AB : ज्ञातान् द्वैत्यपंडितः ।
४. B : मन्यत । ५. B : तावकः । ६. AB : एतावता ।
७. AB : निज । ८. A : कुण्डलादि । ९. B : एनं ।
१०. AB : निषेधनात् ।

अविशेषं निर्विभागपदं सङ्कटवर्जितम्[1] ।
स्वज्योतिश्चिद्घनैकान्तं नौमि ब्रह्म सदोदितम् ॥ ५८ ।

निर्विशेषो विशेषेषु नाभविष्यद् भवान् यदि[2] ।
विशेषावगतिर्न स्यात् सर्वस्य स्वात्मनि स्थितेः ॥ ५९ ।

त्वयि नाथ न भेदोऽस्ति कारणे यत् कुतो भिदा ।
कार्येऽस्मिंस्त्वं पद्मनाभ निर्विशेषं ततो जगत् ॥ ६० ।

त्वत्कारणे[3] त्वं सर्वस्मिन्नपि ज्ञातं तदन्वयात्[4] ।
संवित्समन्विते विश्वे नासंवित् कारणं[5] भवेत् ॥ ६१ ।

सर्वाधारे सर्वमये सर्वतश्चातिरेकिणि ।
त्वय्यन्ते वा कोऽन्यदेशः[6] कालो वा निष्क्रियात्मनि ॥६२।

यथा न कालः कालस्य देशो देशस्य वा परः ।
तथा तवापि सर्वात्मन् व्यतिरिक्तौ न तौ[7] क्वचित् ॥६३।

यत् स्वरूपान्न च्यवते सत् परैर्नोपधीयते ।
यदन्यैरपरिच्छेद्यं तन्नित्यं त्वां[8] विदुर्बुधाः[9] ॥ ६४ ।

परिच्छेद्यपरिच्छिन्नैस्त्वत्तः कालादिसंभवः ।
अप्रमेयस्वरूपस्य तव कालादयो न वै[10] ॥ ६५ ।

तवाप्रकम्प्यरूपस्य[11] युगपत् सर्वसंस्थितिः ।
ज्ञेया [12]क्रमस्वरूपेण यौगपद्याविरोधिना ॥ ६६ ।

क्रमाभावे यौगपद्यं[13] तदभावेऽप्यसौ पुनः ।
तयोर्विरोधभावे स्यान्नेतरेतरसंभवः ॥ ६७ ।

---

१. A : मदशंकल, B: xxल. २. B : विशेषxx ते र्न स्यxxx स्वात्मान्तस्थितेः ।
३. AB : कारण । ४. B : तदवन्दयात् । ५. B : कारणो ।
६. B : कोण्डदेशः । ७. B : नन्यो । ८. B : नास्ति ।
९. B: नास्ति । १०. AB : के । ११. B : रूपंयत् ।
१२. AB : कम । १३. AB : योगपक्ष ।

एवं हि स्वापरापेक्षं[1] यतः समवभासते ।
स्वप्रकाशमनोरूपं तव तत्त्वविदो विदुः ॥ ६८ ।

यो न वह्निर्न वा सोमो न भानुः प्रथते न च ।
ज्योतींष्यतीत्य सर्वाणि स्वज्योतिस्तन्नमाम्यहम् ॥ ६९ ।

काप्यवस्था[2] न[3] ते[4] सास्ति यस्यां संविन्न वर्तते ।
तेन चिद्घनमेव त्वां योगिनः पर्युपासते ॥ ७० ।

इत्येव ज्ञातदेशादेरक्रियाजगदुद्भवः[5] ।
त्वत्तो विवृत्या मन्तव्यो न स्वरूपान्यथास्थितेः ॥ ७१ ।

व्रजरत्नोपमो येन परिणामेन वा पुनः ।
कदाचिदपि संभाव्यो न त्वान्यस्य विनोद्भवः ॥ ७२ ।

अवाताकाशसंकाशान्निस्पन्दोदधितुल्यतः[6] ।
त्वत्तो [7]ज्ञानघनान्नाथ जगत् सर्व[8]ं प्रवर्तते ॥ ७३ ।

[9]योऽस्पन्दपूर्वः[10] सस्पन्दः स्वतो नो[11] व्यतिरिच्यते ।
नातिरिक्ते व्याप्रियते त्वत्तो नास्ति यतः परः ॥ ७४ ।

अन्यत्प्रवर्तमानस्य[12] यद्यपि स्यात् प्रयोजनम् ।
संवित्पर्यवसानत्वात् तस्यापि न पृथक् स्थितिः ॥ ७५ ।

संविन्मूलाद् वर्णपर्णाज्ज्ञानस्तम्भात् सरस्वती ।
प्रागघोषा सनादानु पुण्यतीर्था प्रवर्तते ॥ ७६ ।

त्वत्प्रवृत्ता प्राणयति शक्तिः सा विश्वमोजसा ।
प्रतियान्ती पुनस्त्वां सा संकोचयति संभवम् ॥ ७७ ।

---

१. B : -पेक्ष । २. B : नास्ति । ३. B : नास्ति ।
४. B: नास्ति । ५. B : देशदेः क्रिया । ६. B : तल्यतः ।
७. ज्ञानवतान् । ८. AB : सर्वं । ९. AB : यत् ।
१०. AB : सस्पन्दं । ११. A : स्वतनो, B : नास्ति ।
१२. B : अन्यं ।

कार्यानुरूपं सा रूपं तथा नामापि बिभ्रती ।
निर्वाहयति विश्वस्मिंश्चित्रां यात्रां चराचरम् ॥ ७८ ।
सा वैखरी मन्त्रवर्णा निहन्ति[1] तमसः स्थितिम् ।
मनःसमाश्रया हन्ति मध्यमा राजसीमपि ॥ ७९ ।
निहन्त्यविद्यां पश्यन्ती तदूर्ध्वं[3] प्राणगोचरा ।
त्वदात्मभूता सा शान्ता समं सर्वप्रकाशिका ॥ ८० ।
स्वस्मिन् साध्ये साधनेषु स्वातन्त्र्यं येन संस्थितम् ।
तेनात्यक्ततत्वदाकारा सर्वत्रैषा विजृम्भते ॥ ८१ ।
महाविभूतेरमलात् समात् सूक्ष्मान्निरञ्जनात् ।
भेदेनालक्ष्यवपुषस्त्वत्तः[4] परमकारणात् ॥ ८२ ।
निर्वासनं सदानन्दं शुद्धं सर्वात्मकेवलम् ।
व्यज्यते[5] प्रथमं ज्ञानं यत् [6]तवैश्वर्यसंभवात् ॥ ८३ ।
[7]हेत्वन्तरानपेक्ष्यं[8] यत् स्वातन्त्र्यं विश्वनिर्मितौ ।
तदैश्वर्यं जगद्वेद्यं त्वदृते कस्य संभवेत् ॥ ८४ ।
निपीतचित्तरूपायाः सर्वत्र समसंस्थितेः ।
अव्याहतायाः कार्येषु त्वत्तः शक्तेः समुद्भवः ॥ ८५ ।
ज्ञानान्नान्यत् तवैश्वर्यं भक्तिर्नान्या तथेरिता[9] ।
त्वय्येताः कथिता नाथ ध्यायिविश्रामभूमयः ॥ ८६ ।
वस्तुपूर्वं[10] ततो भावः पश्चादर्थस्ततः क्रिया ।
तथा[11] यदीप्सिततमं तव तत् कर्मसंज्ञितम् ॥ ८७ ।

---

१. AB : निहन्ती । २. A : -हन्ती । ३. B : तदूर्ध्वं ।
४. B: वपुं । ५. B : व्यञ्ज्यते ६. AB : यदत्वै ।
७. B : हे त्वं तद । ८. AB : पेक्ष्यं । ९. A : तथेरिा तु ।
B : नास्ति । १०. B : पूर्वं । ११. A : तया ।

क्रियान्तं सर्वभावेषु चातूरूप्यमिदं यतः ।
चतुरात्मा[1] त्वमेकोऽतः सर्वमावृत्य तिष्ठसि ॥ ८८ ।
शान्तरूपाथ पश्यन्ती मध्यमा वैखरी तथा ।
चतूरूपा चतूरूपं वक्ति वक्ता हि[2] वाग्वपुः[3] ॥ ८९ ।
यथानया जगद् विद्धं सर्वमेव निजात्मना ।
तथा त्वयानुविद्धेयं सर्वतो भाति भारती ॥ ९० ।
सर्वसाधारणं रूपं[4] यतो वाचां प्रवर्तते ।
अभ्येति यत्र च पुनस्तत् ते विष्णोः[5] परं पदम् ॥ ९१ ।
भवन्निष्ठौ यदा देव विश्वस्मिन् प्रभवाप्ययौ ।
व्यवहारेषु सर्वेषु तथा तन्मध्यवर्तिषु ॥ ९२ ।
शरीरजो वा शाब्दो वा मानसो[6] वा समुद्गतः[7] ।
व्यवहारोऽप्यसौ नास्ति यत्र त्वं नाथ नाग्रगः ॥ ९३ ।
त्वामुक्त्वा तत्परं ब्रूमः[8] सद्गतौ[9] व्यावहारिकम् ।
यश्चेन्द्रियाणि मनसा परित्यक्तानि मन्यते ॥ ९४ ।
तच्च[10] वातैः परित्यक्तं तत् सर्वं सर्वविद् भवान् ।
पर्यवस्यति सर्वं च त्वय्येवानन्तरूपिणि ॥ ९५ ।
संविन्निष्ठतया[11] सर्वव्यवहारव्यवस्थिते ।
पृथ्व्यादिकालपर्यन्ताः क्रमात् सूक्ष्मा महत्तराः ॥ ९६ ।
परेषां व्यापकाः पूर्वे निर्मलाश्चानुवेधिनः ।
अलक्ष्यतत्त्वा व्याप्येषु तद्गुणोद्धरणं विना ॥ ९७ ।

---

१. B : चत्वर । २. AB : नास्ति । ३. AB : वर्क वपुः ।
४. B : साधारणे रूपे । ५. B : विस्योः । ६. B : मनसो ।
७. B : समुद्भूतः । ८. AB : ब्रूतः । ९. B : संहातौ ।
१०. AB : तश्च । ११. B : संविन्नष्ठतया ।

यथोत्तरं लोकयात्रामधिकां संप्रतन्वते ।
त्वदधिष्ठिततत्त्वानां[1] येनैषामेव सा[2] स्थितिः ॥ ९८ ।

येनासि सूक्ष्मः सूक्ष्मेभ्यो महद्भ्यश्च महत्तरः ।
तथेदं विहितं विश्वं त्वया नाथ भवन्मयम् ॥ ९९ ।

विना[3] रज्जुं न सर्पाभा यथा साध्यतमात्मिका ।
कर्मेदं त्वत्कृतं चापि[4] त्वन्मयं येन माधव ॥ १०० ।

विलीनाहंकृति [5]ततस्त्वमेव परिशिष्यसे ।
एतावतैव भेदोऽस्य यदहंमानितात्मनि ॥ १०१ ।

सा चेद् विलीना त्वद्भक्त्या नष्टो[6] भेदः स्थितैकता ।
अविद्येयमियं माया मिथ्याज्ञानमिदं तु तत् ॥ १०२ ।

यदचित्रैकरूपे त्वय्यद्वये द्वयदर्शनम् ।
मायात्वमेतदेवास्य[7] यन्नाशस्तत्त्वदर्शनात् ॥ १०३ ।

यदविज्ञातदेहस्य शुद्धधीर्मन्यते पुनः ।
अतिनिर्मलबोधैकरूपे देहपरिग्रहः ॥ १०४ ।

विवर्तपरिणामाभ्यां द्वाभ्यामप्युपपद्यते ।
विवर्ते[8]ऽप्यतथारूपस्तथा भासि त्वमच्युत ॥ १०५ ।

परिणामे स एव त्वं सुवर्णमिव कुण्डले ।
विवर्तात् परिणामस्य भेदस्त्वयि न विद्यते ॥ १०६ ।

न्यूनातिरिक्तान्यथात्वदोषैर्यन्नाभिभूयसे ।
विदुः सब्रह्मका लोका भूताधारं भवद्वपुः ॥ १०७ ।

---

१. B : त्वदधिष्टित । २. B : नास्ति- । ३. B : रज्जुं ।
४. A : -कृतमपि B : -कृतमस्ति । ५. AB : वतस् ।
६. A : नष्ट B : नास्ति ७. B : रः ।
८. A : विवृक्ताव B : विवत्तो व ।

[1]अन्तर्भूतं बहिर्भूतं देवा अपि न तद् विदुः ।
सृष्टौ स्थितौ च संहारे कस्य चाध्यक्षशेषताम् ॥ १०८ ।

महाविभूत्यभिन्नस्य वासुदेवस्य ते विदुः ।
यथा हेम्नो रूपकेषु वैचित्र्यं स्वापरिच्युतम् ॥ १०९ ।

अपरित्यक्तरूपस्य तथा ते विश्वरूपता ।
यथा गलितरूपस्य हेम्नः पिण्डात्मना स्थितिः ॥ ११० ।

तथा गलितवेद्यस्य तव शुद्धचिदात्मता[2] ।
नासतो विद्यते भाव इत्याद्यादेशतः प्रभो ॥ १११ ।

यत् किञ्चिद् दृश्यते लोके[4] तत् सत् पूर्वं त्वदात्मकम्[5] ।
क्रिया त्वदात्मिका विष्णो[6] कार्यं नाथ त्वदात्मकम् ॥११२।

कारणं च त्वमेवात्र किं तदस्ति न यद् भवान् ।
आकृतेरपि सद्भावो न ते नाथ विरुध्यते ॥ ११३ ।

केवलं भौतिकी मा भूत् संविन्मय्यस्ति का क्षतिः ।
अनुल्लिखितरूपस्य[7] ज्ञानं बहिरसंभवात् ॥ ११४ ।

सर्वस्यापि हि भावस्य तत् तु केन निरुध्यताम् ।
भौतिकी वाऽस्तु भगवन् सापि नित्योपपद्यते ॥११५ ।

त्वयि सत्कारणे नित्ये सापि नित्या यतः स्थिता ।
परिणामभवा भावा निवर्तन्ते न केचन ॥ ११६ ।

इति त्वमेव सर्वस्मिन् जगत्येकोऽवशिष्यसे ।
परितः सर्वरूपाय समन्तात् संविदात्मने ॥ ११७ ।

---

१. A : यत्तु B : यन्त । २. AB : भूत । ३. B : -चित- ।
४. B : लोको । ५. B : न्यता । ६. B : विस्नो ।
७. A : अनुलिखितरूपस्य, B : अनुलिखिरूपस्य ।

सर्वतः स्वप्रकाशाय तुभ्यं सद्ब्रह्मणे नमः ।
नन्वहं[1] न पृथक् त्वत्तो न[2] तु त्वमसि मत्पृथक् ॥ ११८ ।
आवयोर्नमनं नान्यत् फलभेदे कथैव का[3] ।
इत्थं ज्ञानक्रियैक्यं स्यात् तदैक्ये का क्रियाक्षतिः ॥ ११९ ।
क्रियाक्षतिर्न चेन्नाथ त्वां नौम्येष सहस्रशः ।
बलादयो[4] हि करणाः सर्वस्मिन्नेव कर्मणि ॥ १२० ।
ते च त्वय्येव नियताः कोऽहं केन करोमि किम् ।
त्वयि संन्यस्तकर्माहं करोमि न करोमि च ॥ १२१ ।
[5]परां निर्वृतिमायामि त्वय्यर्पितविधिक्रियः ।
श्वेतं सहस्रशिरसं महाभोगं[6] वहज्जगत् ॥ १२२ ।
तथानन्तवपुर्नौमि पर्यङ्के शुद्धसंविदः ।
महाभूतदलं पद्मं यस्य [7]नाभेः समुत्थितम् ॥ १२३ ।
भूम्यादिकालपर्यन्तं पद्मनाभं नमामि तम् ।
अन्तर्गृहीतसर्वार्थं भावयन्नादसूक्ष्मकम्[8] ॥ १२४ ।
जगत् सिसृक्षतः पूर्वं नौमि ते स्वसुखं वपुः ।
तदनन्तचिदाधारं बिभ्रन् मन्त्रमयीं च गाम् ॥ १२५ ।
नौमि यज्ञवराहस्य रूपं[9] ज्ञानक्रियात्मकम् ।
वेद्यवेदकरूपेण ज्ञानमेव द्वयात्मकम् ॥ १२६ ।
दर्शयन्तं नरहरे नौमि तेजोमयं वपुः ।
नौमि त्वां वामन सौक्ष्म्याज्जगद्व्याप्त्या[10]
त्रिविक्रमम् ॥ १२७ ।

---

१. AB: नन्ताहं । २. A: न तु व्यस्तं न । ३. B: त का कथा ।
४. B: बल्यादयो । ५. B: परो । ६. A: महाभागं ।
७. AB : नाभेः । ८. B : सूक्ष्मकः । ९. B : रूप ।
१०. B : व्याप्या ।

वायुवाहनरूपेण सक्रियत्वात् खगासनम् ।
[1]ब्रह्माण्डशतसंकाशं नौमि ते व्यक्तरूपिणः ॥ १२८ ।
निःशेषकल्मषप्लोषपावकं[2] तावकं वपुः ।
अनेकसुखदोषोत्थसंतापशमनोद्यतम् ॥ १२९ ।
नौमि त्वां चेतसो राममारामं पुण्यसंपदाम् ।
नमः सर्वविदे तुभ्यं सर्वेश्वर नमोऽस्तु ते ॥ १३० ।
सर्वात्मक नमस्तेऽस्तु सर्वातीत नमोऽस्तु ते ।
यद् भूमिर्विकल्पानां शब्दानां यन्न गोचरम् ॥ १३१ ।
यदलक्ष्यं स्वोपाधीनां[3] नौमि तद् ब्रह्म शाश्वतम् ।
नमामि त्वां[4] च[5] संस्तौमि स्तुतेर्वाचा[6] यतो विधिः ॥ १३२ ।
वाचामतीते भवति किं स्तोत्रैः श्रेयसी गतिः ।
तस्याङ्गभूता[7] या वाचः कतिचिन्मत्समीरिताः ॥ १३३ ।
त्वत्प्रसादनहेतुं मे प्रश्नं तादृशमेव ताः ।
मया वामनदत्तेन त्वया संवित् प्रकाशिता ॥ १३४ ।
यं यं तया प्रसीद त्वं सर्वस्य स्वात्मनि प्रभो ।
रात्रदत्तिर्देवदत्तो रत्नादेव्यां यमात्मजम् ॥ १३५ ।
लेभे वामनदत्ताख्यं तत्स्तुत्या प्रीयते हरिः ।
षष्टयुत्तरं श्लोकशतमिदं बोधं विनापि यः ॥ १३६ ।
पठेन्मधुरिपोरग्रे[8] भक्त्या मोक्षं[9] स गच्छति ।
एकायने प्रसूतस्य कश्मीरेषु द्विजात्मनः ॥ १३७ ।
कृतिर्वामनदत्तस्य सेयं भगवदाश्रया ।

॥ इति संवित्प्रकाशो नाम प्रथमं प्रकरणम् ॥

---

१. AB : कृषाण्ड- । २. B : स्नोष - । ३. AB : स्वपाधीनां ।
४. AB : त्वान् । ५. AB : नास्ति । ६. AB : वाचा ।
७. B : तत्परो । ८. A : घुरिणो B : सफरिपो ।
९. B : मोव ।

अथ द्वितीयं प्रकरणम्

ॐ अप्रमेयस्वरूपाय शुद्धानन्तचिदात्मने ।
स्वसंवित्त्येकसिद्धाय नमस्ते परमात्मने ॥ १ ।

अबहिः साधनाधीनं नित्यं सुखमभीप्सतः[1] ।
तथा दुःखजिहासूंश्च प्रतीदमभिधीयते[2] ॥ २ ।

नात्मनः पर आनन्दो दुःखं नानात्मनः परम् ।
अनात्मनः परित्यागादात्मनः प्राप्तिरिष्यते ॥ ३ ।

अनात्मन्यात्मनो भावादात्मनिष्ठा समाप्यते ।
स्वतस्तथैव यत् सिद्धं किं[3] तत्रान्यैः प्रमान्तरैः ॥ ४ ।

आत्मा न मेयः कस्यापि तदन्यन्नोपपद्यते ।
मेयभेदात्मनो भेदस्तस्याभावे स किंकृतः ॥ ५ ।

आत्मा यदि भवेन्मेयस्तस्य माता भवेत् परः ।
परान्यात्मा[4] तदानीं स्यात् स परो यस्तु मीयते ॥ ६ ।

विषयोक्तिर्न भावादिपदैस्तुल्यार्थवस्तुषु ।
प्रमातृपारतन्त्र्येण सा प्रसिद्धिमयी यतः ॥ ७ ।

स्वीकारो विषयीकारः स [5]तत्रोद्घोष्यते बुधैः ।
यदन्यत्र प्रसिद्धं तत् संविदः किमपोह्यते[6] ॥ ८ ।

संविदा स्वीकृतं यच्च न [7]तद् विषयसंज्ञितम् ।
तत् स्वीकृतं तदात्मैव विषयोक्तिः क्व तिष्ठताम्[8] ॥ ९ ।

---

१. B : -भीत्सताः । २. B : -जिहारं अप्रतीदम- ३. B : कि ।
४. A : पर आत्मा B : परन्यात्या । ५. B : तन्नो- । ६. A : -पोध्यते ।
७. B : पश्चात् । ८. B : स्फुतिष्टताम् ।

यत् सत्तामनुबध्नाति स्वसत्तास्थितये जगत् ।
मानं तदात्मनि ज्ञानं स्वभावात्[1] स्वादतृप्तिमत् ॥ १० ।

आत्मन्यविदितं न स्यादस्य बाह्यप्रमोद्भवः ।
[2]यदेतस्यार्थतामूलं यद्बोध्यञ्च[3] यदत्र च ॥ ११ ।

वेद्यं तद् वेदकं शास्त्रं[4] तद् बोध्यार्थितावशात् ।
जडावबोधो बोधस्य बुधैर्बोद्धुं न पार्यते ॥ १२ ।

[5]भावाभावौ[6] विषयौ[7] तौ विरुद्धौ चिज्जडौ मतौ[8] ।
इतरेतरबोधेन तयोरन्यतरस्थितिः ॥ १३ ।

कल्प्यते न तु संबन्धः स्वभावेन विरुद्धयोः ।
संबन्धोऽपि भवेज्जात्या ताभ्यामर्थवदात्मकः ॥ १४ ।

तदात्मकत्वे ता एव तज्ज्ञातृत्वे पृथक् स्थितिः[9] ।
[10]संबन्धिव्यतिरेकेण[11] सम्बन्धे तैरदर्शिते ॥ १५ ।

भवेन्मुग्धो जनो[12] दूर्तैर्विप्रलब्धो [13]वृथोक्तिभिः ।
संबन्धः सिद्धयोर्नास्ति नैराकाङ्क्ष्येण[14]वृत्तितः ॥ १६ ।

नासिद्धयोरसत्त्वेन तेनासौ स्यान्न[15] वस्तुतः ।
भावनालक्षणं[16] पृष्टैः [17]सिद्धैर्न भावनादृते ॥ १७ ।

शक्यते भावनं वक्तुः[18] परापेक्षाप्रवेशतः ।
यदभिन्नं स्वसंवित्तौ तत्परस्य यदोच्यते ॥ १८ ।

---

१. B : स्वभावत्वाद २. AB : यद् तस्य- । ३. AB : यदबाध्यं ।
४. B : शास्तं । ५. B : स्वव- । ६. AB : -भावा ।
७. A : विषय, B : विदय । ८. B : मनौ ९. B : पृथकियतिः ।
१०. B : संबधिष्यति । ११. AB : रेकेन । १२. A : पूर्त्तैर् ।
१३. B : भवेत् मुग्धौ जनो दूर्तै विप्रलब्धो इति नास्ति ।
१४. B : नैराकांक्ष्येन । १५. B : स्वान्त । १६. B : लतणं ।
१७. B : शिष्टै । १८. BA : वक्त ।

तदा भिन्नमिवाभाति [1]शाब्दीं भूमिमुपागतम् ।
निराकाङ्क्षा न चैकस्य कष्टादर्थे मतिर्भवेत् ॥ १९ ।

अविचित्रे विचित्रे[2] वा वैचित्र्यमभिमन्यते ।
निरस्तकर्तृभावे तु[3] कारणत्वाद्यसम्भवः ॥ २० ।

मेयत्वं हि परिच्छेदः स च[4] ज्ञाने न विद्यते ।
न च भावः स्वतः[5] स्वस्य स्वः कदाचिन्न गोचरः ॥२१ ।

सर्वदैव परस्यायं भवेद् मिथ्याभिमानतः ।
अतद्रूपस्य तद्रूप्यग्रहावेशवशोदयः ॥ २२ ।

न तदस्त्यात्मनो रूपं यत् परेणावगम्यते[6] ।
कथमेतन्न जानीमश्चिन्तयन्तोऽपि यत्नतः ॥ २३ ।

भावानां भवनं रूपं न मातृत्वं न मानता ।
[7]सेयं विनिर्मिता केन[8] मातृमानव्यवस्थितिः ॥ २४ ।

अतिरिक्तं हि सत्ता नो[9] यद् रूपमवधार्यते ।
भावनात्[10] तदिदं मिथ्या न भावानवगाहते ॥ २५ ।

मातृत्वमेयताहानौ यत् तयोरवतिष्ठते[11] ।
[12]पृथक्स्थयोर्ग्रहे[13] रूपं तत्सत्यमितरन्मृषा ॥ २६ ।

यद् यत् सत्तातिरेकेण भावेषु विनिवेश्यते ।
न तत् तद् रूढिमभ्येति व्युप्तं[14] बीजमिवोषरे ॥ २७ ।

कारकग्रामविलये क्रियारूपं परित्यजेत् ।
क्रियावियोगाद् भावानां सत्तैवैकावशिष्यते ॥ २८ ।

---

१. AB : शाब्दी । २. B : अविचिन्ने विचिन्ने ।
३. AB : भावेषु । ४. B : सर्वं । ५. AB : भावयतः ।
६. B : -ावमन्यते । ७. B : सेवं । ८. B : के च ।
९. A : सत्तातो । १०. भावनाम् । ११. B : -वतिष्टते ।
१२ B : पृथक् यथा । १३. AB : गृहे । १४. B : सुप्तं ।

मत्तः परोऽयमेतस्मादन्योऽहमिति यापि धीः ।
नेयमैक्यविरोधेन स्थातुं[1] क्षणमपि क्षमा ॥ २९ ।

[2]परव्यवस्थापि परे यावन्नात्मीकृतः[3] परः ।
तावन्न शक्यते कर्तुं यतो बुद्धः परः परः ॥ ३० ।

[4]बुद्धश्च बोधभेदेन भवेन्न व्यवहारभाक् ।
व्यतिरिक्तस्य बुद्धत्वे सर्वं बुद्धं न किं भवेत् ॥ ३१ ।

स्वसत्तामात्रसन्तुष्टैर्निरपेक्षैः स्वभावतः ।
[5]भावैः किमपराद्धं वो येन मेयत्वमापिताः ॥ ३२ ।

यथेन्द्रियैर्विना भूतं विषयैरप्यनाविलम् ।
स्वतः प्रकाशते ज्ञानं विषयो नैवमिष्यते ॥ ३३ ।

तत्राङ्गविषयज्ञप्त्यैर्यत्[6] प्रमाणत्रयं पृथक् ।
पृथग् विषयसंयोगान्न तदभ्येति वेदनम् ॥ ३४ ।

साक्षात् समक्षधीरर्थात् सम्बन्धादनुमानधीः ।
ते [7]मूलमागमस्याहुरिति नान्यप्रमोद्भवः ॥ ३५ ।

त्रयाणामपि मानानां प्रतिभाप्राणतेष्यते ।
सम्यङ् मिथ्यात्वनिर्णीतेरन्यथानुपपत्तितः ॥ ३६ ।

स्ववित्तिरेव प्रतिभा कर्तव्येषु क्रमात्मिका ।
निर्मला कथिता तज्ज्ञैर्यया जीवन्ति जन्तवः ॥ ३७ ।

सर्वज्ञतायाः सा बीजमैश्वर्यं तदधिष्ठितेः[8] ।
जायते केवलं नैति समस्तात्मसु[9] गोचरम् ॥ ३८ ।

---

१. B : स्याते । २. B : -व्यवस्या । ३. B : -त्मनी ।
४. B : बुद्धा । ५. B : साधैः । ६. B : -ज्ञप्यं ।
७. AB : -राङ्ग- ।
B : सामस्तात्मसु ।
८. B : -धिष्टते । ९. A : सामहात्मसु,

स्वसंवेदनसारेण[1] यदि सर्वस्य मानता ।
तत् किं मानान्तरैः[2] कार्यं [3]मेयोत्तरनिराकृतैः ॥ ३९ ।

अज्ञेन ज्ञानसारूप्यं [4]माने तद् विफलं मतम् ।
वैकल्पिकेन भेदेन[5] वस्तुतस्त्वेकमेव तत् ॥ ४० ।

देशैकरूपा[6] तैर्ज्ञेया संविदर्थप्रकाशता ।
न हि ज्ञानादपोद्धृत्य दृष्टोऽर्थः केनचित् क्वचित् ॥४१ ।

ज्ञानेऽप्यन्तः प्रविष्टस्य[7] भावस्य यदि [8]बाह्यतः ।
ज्ञानादेव तदा बाह्यं स्वमिदानीं किमुच्यताम् ॥ ४२ ।

अर्थाप्रविष्टं विज्ञानं सत्तास्य ज्ञायते कुतः ।
ज्ञानस्यैवाधिकारोऽस्ति सदसन्मार्गणे यतः ॥ ४३ ।

यथार्थो न मया [9]नीतो शुद्धोऽपि न मया तथा ।
इति बोध्यं स्वसंवित्तौ ज्ञानतार्थस्य दुर्घटा ॥ ४४ ।

येन येन विभिद्यन्ते हेतुना भावनिम्नगाः[10] ।
तेन तेनैक्यमायान्ति[11] [12]बोधोदधिसमागताः ॥ ४५ ।

अभावो व्यवहार्येण यथा भेदेन कल्पितः ।
भावोऽपि व्यवहार्येण तथा भेदेन कल्पितः ॥ ४६ ।

यदि भावो विरूद्धयेत भावेनान्येन केनचित् ।
स्वभावेऽपि विरोधोऽस्य भावत्वात् केन वारितः ॥ ४७ ।

[13]विकल्पशून्यज्ञानस्य सत्तैव [14]संविदुच्यते ।
न तु भेदेन कल्पिन्या धिया यद्वद् घटादिकम् ॥ ४८ ।

---

१. AB :-सारैवं २. AB : मानातेरैः । ३. AB : मेयोतर- ।
४. B : मानं । ५ B : भेदं न । ६. A : -रूपस्तै B : रूप्यन्ते ।
७. B : प्रविक्ष्यस्य । ८. AB : अ । ९. AB : नीली ।
१०. B : निम्नगः । ११. B : -ध्यान्ति । १२. B :-नेदधि ।
१३. A : -शून्यस्य । १४. AB : स्वविदु- ।

यतो न वित्तिभेदेन तस्यान्येन निरूप्यता ।
ज्ञानोत्तरनिरूप्यत्वे ज्ञानस्य ज्ञानताक्षतेः ॥ ४९ ।

अविकल्पिकया[1] वृत्त्या सर्वात्मत्वेन भूयते ।
अवच्छेदः कल्पनातस्तदभावादनन्तता ॥ ५० ।

मेयं नाम न वस्त्वस्ति मात्रपेक्षा हि मेयता ।
[2]मातर्यपि न मातृत्वं सत्यं मेयव्यपेक्षणात् ॥ ५१ ।

अनपेक्षा सतां सिद्धेरसिद्धेरपि नासताम् ।
निरपेक्षेषु भावेषु न मातृत्वं न मेयता ॥ ५२ ।

सत्ताया[3] न विशेषोऽस्ति सापि स्वयमनेकता ।
निर्मूलैवाहृता[4] कस्मादिति माया न बुद्ध्यते ॥ ५३ ।

प्रकाशते संविदेका तदन्यत् तु[5] प्रकाश्यते ।
प्रकाश्ये च भवेत् कर्म तच्च कर्त्रा विना कथम् ॥ ५४ ।

कर्तृत्वं च न सत्तायाः कथञ्चिदतिरिच्यते ।
सत्तैव यदि कर्तृत्वं [6]तदनुक्तमसंवृतम् ॥ ५५ ।

असत्त्वादेव नो सत्त्वमसतां परिकल्प्यते ।
[7]विचित्रत्वं तु सत्ताया न विनान्यानुवेदनम् ॥ ५६ ।

सत्तायास्तु भवेदन्यद् यदसत्तां[8] विचिन्तयेत् ।
कथं सत्ता सतो हेतोर्वैचित्र्यं नास्ति तां प्रति ॥ ५७ ।

वस्तुस्थित्या न बन्धोऽस्ति [9]तदभावान्न मुक्तता ।
विकल्पघटितावेतावुभावपि न किञ्चन ॥ ५८ ।

---

१. A : अविकल्पकया ।
२. B : मतर्यपि ।
३. B : सत्ता यो तु ।
४. A : -ाहृता ।
५. B : तदत्यन्ता ।
६. B : -तूक्तम- ।
७. B : विचिन्नत्वं ।
८. AB : सत्ता ।
९. A : तदा- ।

मेयमानप्रमातृत्वैर्मितौ यत् पर्यवस्यते ।
चतुष्पथा बोधनका [1]चतुरात्म्योक्तिभाजनम् ॥ ५९ ।

इमां वामनदत्तेन विहितामात्मसंस्तुतिम् ।
अधिगम्य[2] विमुच्यन्ते जन्तवो भवविप्लवात् ॥ ६० ।

एकायने प्रसूतस्य कश्मीरेषु द्विजात्मनः ।
कृतिर्वामनदत्तस्य सेयमात्मप्रकाशिनी ॥ ६१ ।

॥ [3]इत्यात्मसंस्तुतिर्नाम द्वितीयं प्रकरणम् ॥

●

१. °श्चातुरान्योक्त- । २. B : अपि तस्य । ३. A : आत्मसंततिं ।

* महोदयन (स्व.प्र., P.88-तं.सं.) also includes this in नारदसंहिता:
'सर्वो विकल्पः संसारो मान्यो बन्धो विकल्पतः।'

अथ तृतीयं प्रकरणम्

यस्य मायापरिस्पन्दविहिता विश्वसंस्थितिः ।
अस्मद्विकल्पसंङ्कल्पसंहर्ता[1] तमहं नतः[2] ॥ १ ।

*[3]सर्वो विकल्पः संसार इत्युक्तेरयमाशयः ।
यदसत्त्वं सृतेः[4] सत्त्वं शुद्धायाः संविदः स्थितम् ॥ २ ।

विकल्पशब्दो लोकार्थप्रसिद्ध्या[5] न हि सार्थकः ।
किन्तु शास्त्रप्रसिद्ध्यैव सा चास्मिन्न प्रतिष्ठिता[6] ॥ ३ ।

सत्सु शब्देषु चार्थेषु संवृतो वाथ वास्तवः ।
सम्बन्धस्तेषु सम्भाव्यो विकल्पार्थो बहिः क्व सत् ॥ ४ ।

अर्थवन्तः सर्वशब्दा विकल्पार्थेन यन्मतम् ।
औपचारिकया वापि सत्तया तन्मतद्वये ॥ ५ ।

भवेदेतद्विकल्पार्थो यदि कश्चित् स्थितो भवेत् ।
यावदेतत् तदर्थस्य नाद्याप्यस्ति प्रतिष्ठितिः[7] ॥ ६ ।

न चोपचारसत्तापि विकल्पार्थात् परा मता ।
पृथक्त्वं वास्तवत्वं स्यादुपचारेऽस्तमायाति[8] ॥ ७ ।

विकल्पशब्दस्यान्ये किं शब्दाः पर्यायतां गताः ।
स वा तेषां यदेतस्य तेषां चैकार्थतोच्यते ॥ ८ ।

विकल्पशब्दो नाप्यर्थस्तेषां ते न तदर्थता ।
उच्यते सर्वशब्दानां यदि लोकोऽनुमन्यते ॥ ९ ।

---

१. B : -विकल्पसे । २. B : नतः । ३. A : सर्वे ।
४ A : -सत्त्वमृतेः । ५. B : -प्रसिद्धा । ६. B : प्रतिष्टिता ।
७. B : प्रतिष्ठितः । ८. AB : -ायति ।

विकल्पशब्दत्वं वाच्यं यदि किञ्चित् प्रकल्पयेत् ।
इतरेऽपि तदर्थं न नार्थवन्तः कथं किल ॥ १० ।

विकल्पार्थश्च शब्दार्थ इत्युक्तिः पर्यवस्यति ।
निरर्थकत्वे शब्दानां विकल्पार्थो यतो मतः[1] ॥ ११ ।

स्थित्युत्पत्ती विना शाब्दौ यदा मोहविमोहिताः ।
पतन्ति [2]प्रतिपत्तारः सविकल्पो विविच्यते[3] ॥ १२ ।

विवेच्यते विकल्पोऽपि विकल्पेन तदात्मना ।
विचाररहितं येन निर्विकल्पं स्ववेदनम् ॥ १३ ।

विचार्यते विकल्पस्य व्यापारस्थितिरुद्भवः ।
स्वरूपं वेत्ति[4] नैतेभ्यो यद् विचारपदं परम् ॥ १४ ।

तत्र स्वरूपं शब्दो वाप्यर्थो वा ज्ञानमेव वा ।
शब्दार्थयोर्विकल्पत्वे न [5]तावल्लोकसम्मतम् ॥ १५ ।

शिष्यते केवलं ज्ञानं न तत्रापि विकल्पता[6] ।
सर्वत्रास्ति विशेष्यत्वं विकल्पेन चितो यतः ॥ १६ ।

सम्भवे व्यभिचारे च विशेषणपदा चितिः ।
विशेषणपदस्यार्थे प्रसिद्ध्याङ्गीकृते सति[7] ॥ १७ ।

यावद् विकल्पशब्दस्य कश्चिदर्थो न साधितः[8] ।
तावद् विशेषणं[9] नायं शब्दमात्रो निरर्थकः ॥ १८ ।

उद्भवश्चिन्त्यते तस्य यस्य व्यापारसंस्थितिः[10] ।
ज्ञायते तदभावे तु[11] कस्य कस्मात् समुद्भवः ॥ १९ ।

---

१. AB : नमन् । २. B : प्रतिपन्नातः । ३. विरिच्यते ।
४. A : चेति । ५. B : -नाव । ६. B : विकल्पना ।
७. B : मुनि । ८. B : मापितः । ९. B. विशेषणे ।
१०. AB : संस्थिती । ११. B : -भावेन ।

स्थितिरव्यापृतस्यापि न कस्याप्युपलभ्यते[1] ।
व्यापारेण पदार्थानां [2]यत्स्वरूपावधारणम् ॥ २० ।

अर्थक्रियासमर्थत्वाल्लक्षणत्वाद्धि वस्तुनः ।
यदनर्थक्रियाकारि न तत् सदिति युज्यते ॥ २१ ।

व्यापारविरहादेव[3] न [4]पुष्पादेरसत्प्रथा[5] ।
व्यापारश्च विकल्पस्य न स्वात्मनि परेऽपि वा ॥ २२ ।

नाभिमानगृहीतोऽपि विकल्पस्तेन नैव सत्[6] ।
परस्य तेनासंस्पर्शो यथावद् वस्तुनस्ततः[7] ॥ २३ ।

व्यापारः स्वात्मनि न च[8] सिद्धेः स्वात्मनि तेन[9] किम् ।
[10]नहि सिद्धेषु भावेषु व्यापारः फलवान् भवेत् ॥ २४ ।

अभिमानगृहीतं तु भवेत् सम्भावनास्पदम् ।
विकल्पादभिमानस्य मतिभेदे प्रसाधिते ॥ २५ ।

यस्त्वैक्ये[11] नाम भेदोऽयमेतयोर्न स्वरूपतः ।
गृहीतोक्तिरतो व्यर्था[12] स्वात्मैवास्तु[13] तथाविधः ॥ २६ ।

तस्माद् विकल्पः[14] संशुद्धाद् विज्ञानान्नातिरिच्यते ।
तेनैव निर्विकल्पोऽयं विकल्पः स्वात्मनि स्थितः ॥ २७ ।

अगृहीते गृहीतोक्तिर्निश्चितोक्तिरनिश्चिते ।
क्रियते मन्दमतिभिर्विकल्पस्य विकल्पकैः ॥ २८ ।

पूर्वापरं न मन्यन्ते नापि शब्दस्य कारणम् ।
विकल्पः केवलं ज्ञानं न च ज्ञानं विशिष्यते ॥ २९ ।

---

१. B : -प्युलभ्यते । २. B : यतव- । ३. -विरहारे वान ।
४. AB : पुष्पादे । ५. B : सम्यथा ।
६. B : -न नैव सत् इति नास्ति । ७. A : गते-; B-गत ।
८. B : न च इति नास्ति । ९. B : नास्ति । १०. B : नास्ति ।
११. B : यद्यैक्ये । १२. B : न्यर्था । १३. B : न्य ।
१४. A : विकल्प ।

विशेषणं विजातीयं तच्च ज्ञाने जडं भवेत् ।
न जडस्य प्रवेशोऽस्ति ज्ञानात्मनि कथञ्चन ॥ ३० ।

परस्परविरुद्धा हि जडचेतनयोः स्थितिः ।
प्रकाशस्य तमः शक्तं न विशेषयितुं क्वचित् ॥ ३१ ।

पूर्वापरेण सम्बन्धमशक्यं भिन्नकालता ।
पौर्वापर्ये यतो हेतुस्तच्चैकस्तु[1] कथं न सः ॥ ३२ ।

अथ निर्विषयं ज्ञानं न क्षमं[2] भवितुं यदि ।
विषयोऽपि कथं शक्तः स्थातुं विषयिणा विना ॥ ३३ ।

परस्परविधातृत्वं यदि वा मतमेतयोः ।
तदयुक्तं यतः कार्यात् कारणं पूर्वमिष्यते ॥ ३४ ।

परस्परानपेक्षा चेत् सत्ता विषयतद्वतोः ।
सिद्धा सिद्धो विकल्पस्य[3] स्वात्मैव हि तथाविधः[4] ॥३५॥

विकल्पात्मनि सर्वत्र[5] व्याप्य [6]चेदास्थिता चितिः ।
विकल्पस्य विकल्पत्वं[7] किं तज्ज्ञानातिरेकि यत् ॥ ३६ ।

विषयान्न विकल्पत्वं[8] न स्वरूपाच्चिदात्मकात् ।
विकल्पस्य विकल्पोक्तिस्तदिदं खे विलीयते ॥ ३७ ।

यैर्विकल्पात्मनि ज्ञानं सर्वमेव प्रतिश्रुतम्[9] ।
[10]तैरर्थान्निर्विकल्पं तदुक्तं स्वात्मन्यकल्पनात् ॥ ३८ ।

यैर्वा विकल्पहेतुस्तद्विकल्पे किं न बोधता ।
[11]बोधता चेत् कुतो भेदो न हि स्वात्मनि भिन्नता ॥३९॥

---

१. AB : स्तों चेकं । २. B : क्षमं च । ३. B : विकल्पोऽस्य ।
४. B : तथाविधिः । ५. B : संवृत्त । ६. B : वेद- ।
७. B : विकल्पत । ८. A : विकल्पत्व । B : विकल्प ।
९. B : प्रतिस्फुतम् । १०. B : तैर । ११. A : भेधता ।

अबोधता विकल्पे चेत् कथं विज्ञानजन्यता ।
नोपादानं विरुद्धस्येत्येवं [1]नान्यगतिस्थितेः ॥ ४० ।

अन्यत्वे च विरुद्धत्वाद् ज्ञानं नैवोपपद्यते ।
विरुद्धत्वं विनान्यत्वे स्वात्मैव हि न किं परः ॥ ४१ ।

तस्मादस्तीह विज्ञानं नित्यं सहजनिर्मलम् ।
एकं विचाररहितं यद्योगिभिरुपास्यते ॥ ४२ ।

एवं चेज्जगतश्चित्रा संस्थितिः किं कृता मता[2] ।
अविचित्रात् [3]तु [4]विज्ञानाद् वैचित्र्यमुपपद्यते ॥ ४३ ।

अत्रोच्यते न वैचित्र्यं पदार्थेषूपपद्यते ।
सर्वस्यात्मैकनिष्ठत्वात्[5] परेण च न सङ्गमात् ॥ ४४ ।

तद्वद्भावैकतात्यागात्[6] तत्त्यागे चित्रता गतेः ।
पृथग्बाह्येषु[7] दृष्टेषु [8]बहुभिन्नास्ति चित्रता ॥ ४५ ।

एकबुद्धिसमारूढे चित्रत्वे का विचित्रता ।
पृथक् स्थितेषु[9] बाह्येषु का भावेषु विचित्रता ॥ ४६ ।

ज्ञानस्य च विचित्रत्वं [10]स्वप्नेऽपि न यदा हृतम् ।
प्रबुद्धे तदिहादित्वमिति केनावगम्यताम् ॥ ४७ ।

जागरायां यथा बुद्धैः[11] [12]स्वप्नज्ञानमसत्कृतम् ।
जागरापि तथा शुद्धज्ञानात्मभिरसत्कृता ॥ ४८ ।

---

१. A : न्याय- ।
२. B : सता ।
३. A : अविचित्रा तु B : अविचिन्नान्नः ।
४. AB : विज्ञाताद् ।
५. B : निष्टत्वात् ।
६. B : ननुद्भावेकता ।
७. B : पृथगङ्गेषु ।
८. B : वङ्गभिज्ञास्ति ।
९. B : पृथकियतेषु ।
१०. B : स्वमे ।
११. B : बुद्धेः ।
१२. B : स्वम- ।

तस्माद् यैरुच्यते मूढैर्विचित्रेयं प्रथा कुतः ।
ते प्रत्युक्त्या विचित्रत्वस्यैकवस्तुसमाश्रितेः ॥ ४९ ।

यस्मान्निरंशे विज्ञाने चित्रतायाः समुद्भवः ।
[1]सांशे [2]भवेयुस्तेऽप्यंशा भिन्नता नास्ति वै यतः ॥ ५० ।

तेन[3] विज्ञानविज्ञेया [4]तत्रान्येन न संस्थितिः ।
तस्माज्ज्ञानमसंक्रान्तरूपं शक्तं न [5]तदृते ॥ ५१ ।

रूपसङ्क्रान्तिमेतस्य भागवृत्तां[6] प्रकल्पयेत् ।
सा चास्मिन् दुःशका ज्ञातुं तेन न ज्ञानचित्रता ॥ ५२ ।

ज्ञानेन न[7] यदादिष्टं न तद् [8]ग्राह्येण गम्यते ।
तथैकतायां चित्रत्वमपि बाह्येऽतिदुष्करम् ॥ ५३ ।

अनेकता चित्रता हि सा चैकत्वविरोधिनी ।
ज्ञानज्ञेयपरित्यागाच्चित्रता शब्दमात्रकम् ॥ ५४ ।

एवं वैचित्र्यसद्भावे प्रतिषिद्धे पराकृता ।
मातृमानप्रमेयाणां[9] पृथक्त्वानामपि[10] स्थितिः[11] ॥ ५५ ।

एतत्त्रयपरित्यागे येन रूपेण भूयते ।
तेनैव सत्यं विज्ञेयं तदन्यदसमञ्जसम् ॥ ५६ ।

विलीयमाने पुरतः स्वात्मस्थस्यासमञ्जसे ।
प्रपञ्चेऽस्मिन्नविश्वासे विश्वस्तास्ते[12] कथं चिरम् ॥५७ ।

स्वप्ने वापि समाश्वास इत्थं केन निवारितः ।
नहि स्वप्नेन दृश्यन्ते भावा बहुविधा बहिः ॥ ५८ ।

---

१. B : संशे । २. B : भावेयुस् । ३. AB : तेन्य ।
४. AB : स्तत्र । ५. A : तं द्रितौ, B : ते द्रतौ । ६. A : भागवतां ।
७. A : नास्ति । ८. AB : ग्राह्यैव । ९. B : प्रमेयानां ।
१०. B : पृथक्यानामपि । ११. A : श्लोकाः ३।३१-४२ ३।५४—५५ श्लोकयोर्मध्ये विद्यन्ते । १२. AB : विश्वस्ताः ।

स्वप्ने[1] भीतैः प्रयत्नेन प्राप्यते जागरा यथा।
जागरायां तथा दुःस्थैर्यत्नाल्लभ्या परात्मता ॥ ५९ ।
इति वामनदत्तेन विकल्पोऽपस्तवः कृतः।
य एनमवगाहन्ते बाध्यन्ते ते न विप्लवैः[2] ॥ ६० ।

॥ इति विकल्पविप्लवो नाम तृतीयं प्रकरणम्[3] ॥

१. B : स्वप्न। २. B : विस्नवै। ३. A : श्लोकाः ६१।

अथ चतुर्थं प्रकरणम्

यज्ज्ञेयं पुरुषेणेह संसारविचिकित्सुना ।
तदुच्यते यथाम्नायं न्यायानुभवसम्मितम् ॥ १ ।

देहश्च कार्यो भूतानां तानि शक्त्युद्भवान्यपि ।
सा विद्या प्रकृतिर्मायेत्यादिशब्दाभिधेयताम् ॥ २ ।

प्रतिदर्शनभेदेन प्रतिपन्ना निजाकृतिः[1] ।
अमुञ्चती पारतन्त्र्यमीश्वरादिपदाभिदे ॥ ३ ।

ततोऽप्यभिन्ना भिन्ना[2] वेत्यभिधातुं न शक्यते ।
न हि नित्यैकरूपस्यानित्यं बहुविधं वपुः ॥ ४ ।

न भिन्नं शक्यते वक्तुमपृथक् सिद्धयोगतः ।
सत्येयमस्त्वसत्या वा नास्माकमुपयुज्यते ॥ ५ ।

अस्या हेयैकरूपत्वादलं रूपनिरूपणैः ।
किन्त्वविज्ञातरूपस्य हेयतैव न बुध्यते ॥ ६ ।

तेन हेयत्वविज्ञाने विज्ञेयेयं न रूपतः[3] ।
यद् यत् कर्मपदं[4] प्राप्तं तत् तद्धेयं विचक्षणैः ॥ ७ ।

कर्मणश्च परित्यागात् कर्तृतापि विलीयते ।
कर्तृकर्मपरित्यागाद् यन्मातुरवशिष्यते[5] ॥ ८ ।

तदुपादेयतां यातमेतयोः परिहारतः ।
[6]नित्यलब्धतयाप्यस्य लब्धकः[7] केन[8] लभ्यते ॥ ९ ।

---

१. AB : निजाकृतेः । २. AB : भिन्नभिन्ना । ३. B : रूपता ।
४. AB : -पद । ५. B : -मातर- । ६. A : नित्यब्धष्य,
B : नित्यलनुभयाप्य । ७. AB : लब्धाकः । ८. AB : कश्च ।

यद् यस्य[1] कर्मपदवीमुपारोहति देहिनः ।
अशरीरं तदा ज्ञेयं[2] सर्वं विद्याविजृम्भितम् ॥ १० ।

हेतुः[3] सा देहवैचित्र्ये सर्वेन्द्रियतया बहिः ।
सप्तधात्वात्मनाप्यन्तस्त्रिधातुकतयापि[4] वा ॥ ११ ।

एका सा विविधावस्था चराचरतया स्थिता ।
द्विषट्कपत्रं सा पक्षं कालमाधारमाश्रिता ॥ १२ ।

व्यज्यते कलनात् तस्याः कालः कालत्वमागतः[5] ।
सोत्पादक्षयरूपेण भावानां कालकर्षणी ॥ १३ ।

क्रियात्मको हि यः कालः क्रियाकारकमाश्रितः[6] ।
षोढा च कारकग्रामः[7] शक्त्यात्मनि हि तिष्ठति ॥ १४ ।

शक्तिर्द्रव्याश्रिता नित्यं तत्परं ब्रह्मशब्दितम् ।
तत्समुत्था व्याप्रियते परे सा विश्वकर्मणि ॥ १५ ।

सा स्वसंस्कारचिह्नेन प्रत्यगात्मानमात्मनः[8] ।
उपोद्धरति संलीनं प्रलये वासराचितम् ॥ १६ ।

तस्याधारतयात्मानमपि सैव व्यधात् तथा ।
यथायमीश्वराज्ञास्थो वर्तते भोगमोक्षयोः ॥ १७ ।

स तु तस्यां यदोद्विग्नो मोक्षसंस्कारचोदितः ।
तदा पलायते तस्या येनैवायमिहागतः ॥ १८ ।

विषयावनिपर्यन्तं स कृत्स्नो ब्रह्मणस्तथा ।
ततस्तामेव पूर्वं स विचिकित्स्यतयाश्रितः ॥ १९ ।

---

१. AB : यद्यश्च । २. AB : स्थेयं । ३. AB : हेतु ।
४. AB : -स्त्रे- । ५. AB : -गताः । ६. AB : -श्रिता ।
७. AB : - ग्राम । ८. A : -नामात्मनः, B : -ननात्मनः ।
९. B : -ग्र- ।

को यो हि विषयो नाम स्वतन्त्रस्य समास्थितः ।
मायेयं यन्न जानाति तत्त्वमस्य विवेचयन् ॥ २० ।

एकोऽयं स्यादनेको वा तत्त्वमत्र न बुद्ध्यते ।
एकत्वेनास्ति वै तथ्यं वैतथ्ये चैकता कथम् ॥ २१ ।

अहमेको निरंशश्च सांशानेकग्रहक्षयः ।
कथं स्याद् ग्रहणं तद् वा कस्य धर्मोऽवसीयताम् ॥ २२ ।

पृथक्स्थयोर्द्वयोर्नो[1] यत् तच्चेत् सङ्गतयोः स्थितम् ।
माया न यदि तत् कोऽर्थः[2] स स्यादिति विवेच्यताम् ॥ २३ ।

इत्थं विषयनिष्पेषे यदिन्द्रियसुखेन यत् ।
ज्ञायते वस्तुनो रूपं न तत् किञ्चिदिति स्थितम्[3] ॥ २४ ।

इन्द्रियस्यापि विषयाभावात् करणता क्व नु ।
एवं या गोलके शक्तिरैन्द्रियी सा विलीयते ॥ २५ ।

अस्तु वा विषयो नाम कथञ्चिदुपपादितः ।
तथापि तत् तत्त्वविदां न सम्मोहयितुं क्षमः ॥ २६ ।

विषयस्यापि यद् रूपं सूक्ष्मं तदपि भावयेत् ।
स्वदेहेन्द्रियदेशेषु यत्र यत् संविदा स्थितिः ॥ २७ ।

जपन् भगवतो नाम स तस्यैव वशो भवेत् ।
तद्वशत्वे स विषयो न स्यात् क्वापि निबन्धकृत् ॥ २८ ।

मूले मध्ये तथाग्रे च शब्दस्पर्शरसाश्रयम् ।
विज्ञेयमिन्द्रियं स्वं स्वं जिह्वायां सह संविदा ॥ २९ ।

रसना यत्र चोत्क्षिप्ता किञ्चिद् विकिरति[4] स्वयम् ।
तद्रूपसंविदः क्षेत्रं तज्ज्ञानेनावधारयेत्[5] ॥ ३० ।

---

१. B : पृथक्ययोर् । २. A : तर्को भूः । ३. A : संस्थितम् ।
४. AB : विकरति । ५. A : -ज्ञानं तत्र ।

घोणाग्रे[1] धारयेद् विद्वानिन्द्रियं गन्धसंविदः ।
एकस्माद् येन चोत्पत्तिर्मता विषयतद्वतोः ॥ ३१ ।
मनःक्षेत्रं तथा कण्ठो बुद्धिं शिरसि धारयेत् ।
उरसोऽन्ते समूहं च यत्र सत्त्वं रजस्तमः ॥ ३२ ।
आवापयति विज्ञानं कर्मिणो विकलस्थितेः ।
तेन तत्र समादद्यात् परिशुद्धेन चेतसा ॥ ३३ ।
व्यज्यते तत्र कर्मात्मा सर्वसंस्कारसंस्कृतः ।
तस्यापवर्गसंस्कारेष्ववधेयं कृतात्मना[2] ॥ ३४ ।
ते हि संस्कारसंस्कारविरोचकतया यतः ।
वर्तते तेन तेष्वेव मुमुक्षुर्यत्नवान् भवेत् ॥ ३५ ।
स्तनस्याधो [3]वामपार्श्वे दोषस्थानमनुस्मरेत्[4] ।
तद्बुभूषान्[5] ततो दोषान् वारयेच्छुद्धचित्स्मृतिः ॥ ३६ ।
उरोहृदययोर्मध्ये कालपुष्करमास्थितम् ।
धारयेत् तत्र विज्ञानमिन्द्रियं तद् विवेचकम् ॥ ३७ ।
ततो मध्यमनाडयात्मा विवेच्यो यत्र सन्निधिः ।
अध्यक्षस्यात्मनि[6] स्वस्थः स इष्टो योगिभिर्यतः ॥ ३८ ।
[7]आद्यैव सा परा शक्तिः कर्मकारितया स्थिता ।
भूतात्मना च विद्येति तामाहुर्ब्रह्मवादिनः ॥ ३९ ।
तन्वी नीवारा शूकाभा नैतद् यत्र न सा स्थिता ।
तन्मध्यविनिविष्टानां नास्ति सङ्कल्पसम्भवः ॥ ४० ।
सङ्कल्पासम्भवात् तत्र न मृत्युर्बाधते बुधान् ।
मृत्युः सङ्कल्पजन्मैव[8] निर्विकल्पेषु नास्त्यसौ ॥ ४१ ।

---

१. B : घोणाग्र । २. A : हतात्मना । ३. B : वा स ।
४. B : स्थानम् । ५. A : बुभूर्षं, B : बुभूषे ।
६. B :-नदनी । ७. AB : अदन्येव । ८. B : -त्मैव ।

स्वप्रकाशवपुषः समुत्थिता
नादशक्तिरिह विश्वकारणम् ।
कर्तृकर्मकरणादिभेदगां
सा बिभर्ति तनुमष्टमूर्तिकाम् ॥ ६ ।

शब्दशक्तिरविभागमागता
बिभ्रती सकलविश्वरूपताम् ।
सेव्यते प्रतिभयैव शुद्धया
त्वत्समागमविधानहूतिका ॥ ७ ।

भोक्तृभोग्यविषयस्य वस्तुतः
साग्निचन्द्रजननेन ज्ञायते ।
मातृका इव पितुः समागमा-
देव या मसृणमारुतेरिता ॥ ८ ।

वाच्यवाचकविभागवर्जितं[1]
नेह किञ्चिदुपपत्तिभाग् यतः ।
त्वामृते तत इयं भवद्वशाद्
द्वैधमेत्य बहुधा विवर्तते ॥ ९ ।

आद्यबीजसमवस्थितिः[2] सदा
ज्ञायते न तु तदेति[3] चाप्ययम् ।
तत्स्वरूपपरिलब्धवृत्तिभि-
र्भूयते विभुतयैव[4] बुद्धया ॥ १० ।

---

१. A : -विवर्जितं ।
२. A : -समवस्थितिः ।
३. A : ननवदेति ।
४. A : विभु तथैव ।

तद्विवृत्तिरुदिता [1]जगत्पति-
स्तद् विना भवति नैव येन सा[2] ।
तत्स्वरूपघटिता[3] विलुप्यते
तद्विवृत्तिरिति कथ्यते बुधैः ॥ ११ ।

तद्द्वितीयकलनात् कलावतः
[4]कालताप्तमिह सम्भवो भवेत् ।
दीर्घतामिव यतः [5]समागतं
भाति [6]यत् स्वमपि नाथ ते वपुः ॥१२ ।

तत्तृतीयलब्धरूपवर्णता
[7]पञ्चप्राणसहिता निगूहिनी ।
तावके वपुषि वर्णसंग्रहा
शक्तिरुद्भवति विश्वरूपिणी ॥ १३ ।

ॐ रूपं[8] किं[9] सिद्धमेतत् तन्नान्यद्
[10]वाच्येऽनित्ये वाचको नह्यनित्यः ।
वाच्यं ब्रह्मप्रणवस्यैव सिद्धं
दिक्कालाद्यैर्यत् परिच्छिद्यते न ॥ १४ ।

तेनैवायं सर्ववेदेषु पूर्वं
स्वाध्यायादौ वेदविद्भिः प्रणीतः ।
तस्मिन्नुक्ते वाचि [11]यत् सम्मुखत्वे
तन्नः सिद्धं सर्वदा च भवद्भ्यः[12] ॥१५ ।

---

१. A : जगति- । २. A : मनसा । ३. A : -गतितो ।
४. A : कालतम्नत्तह । ५. A : समागते । ६. A : नास्ति ।
७. A : -साण- । ८. A : स्वरूपं । ९. A : कं ।
१०. A : वाच्ये । ११. A : नास्ति । १२. A : यद्भूम्यः ।

तस्मिन्नन्तः सर्वसिद्धं प्रविष्टं
[1]वाचस्तत्त्वं वाग्विवर्तं[2] च सर्वम् ।
अन्त्यौ स्वरौ बिन्दुविसर्गयुक्ता-
वाद्यस्य दीर्घेण परेण भेदः ॥ १६ ।

तथैव पञ्चार्णविभेद उक्तः
षष्ठस्तथाद्यावपि चान्त्ययोर्यौ ।
योऽतः परोऽपि स्वरवर्णवर्ग-
स्तृतीयमूलो विबुधैरपीष्टः[3] ॥ १७ ।

शाक्तं यथैतावदिह प्रदिष्टं
वर्णद्वयं सर्वविकारबीजम् ।
अधिष्ठितं यत् परमेण पुंसा
प्रागन्तयोरच्युतरूपिणैव ॥ १८ ।

मूलं तदेवेह निरस्तरूपं
सर्वार्णरूपं प्रथमं यदाहुः ।
तस्माज्जाताः सर्ववर्णस्य भेदा
येषां विश्वचित्ररूपानुकारि ॥ १९ ।

एककादिपरिपोषितं क्रमात्
सर्वषट्कपरिपूर्णविग्रहम् ।
वर्णषट्कमिह विश्ववस्तुनः
सूक्ष्मतां समुपगृह्य वर्तते ॥ २० ।

वर्णपङ्क्तिरियमेत्य चित्रतां
संस्थया विविधया विवर्तिता ।
वाक्यतामथ पदानुसंधितां
लोकसंविधिकृते प्रपद्यते ॥ २१ ।

---

१. A । -स्तत्त्व । २. A । -विर्वते । ३. A । -धीष्टः ।

यत् तु पूर्वमविभक्तरूपया
शुद्धया प्रतिभया समाश्रितम् ।
लौकिके न तदुपैति वाक्यतां
वक्तरीच्छति परप्रबोधनम् ॥ २२ ।

वर्णषट्कमिदमेव तत् स्वयं
सूर्यसोममयतां समाश्रयत् ।
द्वादशार्णविधिना दिनं व्यधात्
षोडशार्णविधिना च शर्वरीम् ॥ २३ ।

षोडशार्णविधिमध्यसंस्थितं
यन्नपुंसकचतुष्टयं विधौ ।
तन्मलं शशितयोदितं बुधै-[1]
स्तद्वशादुभयहानिभागयम् ॥ २४ ।

दक्षिणेन दहनात्मतां दधद्
दाह्यतामपि तथोत्तरेण तु ।
मध्यमेन तु समत्वदक्षिणो-
त्तरं दधच्चास्ति तयोः प्रवर्तकम्[2] ॥ २५ ।

वागेवास्याः कारणं विश्ववृत्ते-
[3]र्न्याय्यं चैतन्नागमः केवलोऽयम् ।
नासंकल्पं किञ्चिदस्तीह कार्यं
वाचं विना न विकल्पोऽस्ति कश्चित् ॥ २६ ।

नावर्णा वाग्वाचिका किञ्चिदेव
वर्णास्त्रिंशद् विंशतिश्चैकरिक्ताः ।
[4]वर्णा नादात् [5]सम्भवन्त्येवमेव
नादः श्रेष्ठः[6] प्रणवप्राण एकः ॥ २७ ।

---

१. A : बुद्धैस् । २. A : -त्तरमथ प्रवार्यकम् । ३. A : न्यायं ।
४. A : वणाः । ५. A : संभवत्य- । ६. A : श्रेष्टः ।

तस्मान्नादात् प्रणवप्राणनोर्ध्वाद्
भेदं प्राप्तं[1] द्वादशानां चतुष्कम्[2] ।
एकश्चार्णो यः परं ज्ञानमुक्तो
[3]यत्प्राणो वाग् विश्वमेतत् तनोति ॥२८॥

ॐकारोऽयं प्रतिभा विश्वकर्तु-
[4]र्विष्णोरुक्तो वेदवेदान्तविद्भिः ।
[5]अस्मिन्नन्तर्युगपत् सन्निविष्टं
यावद् वाच्यं वाचकं यावदेव ॥ २९ ।

भात्मैवायं देवदेवः पुराणो
नैनं प्रति प्रतिशब्देन योगः ।
परापेक्षः[6] प्रतिशब्दाद् यतः सः
नातः परः कस्यचिदप्रमेयः ॥ ३० ।

जगत् सिसृक्षो रञ्जितस्य पूर्वं
वेदात्मैकः प्रणवः संबभूव ।
अन्तर्निगीर्णप्रलयोदयोऽयं
जगत् समीक्ष्य प्रतियोगमेति ॥ ३१ ।

एतद्वाच्यात् सर्ववाच्यप्रसूति-
र्यद्वत् तद्वद् वादकानामतोऽसि ।
[7]यथैवासावनभिव्यक्तरूप-
स्तद्वल्लोके प्रणवोऽपि प्रसिद्धः ॥ ३२ ।

---

१ A : प्राप्ता । २. A : चतुष्टम् ।
३. A : यत्प्राणा । ४. A : विस्नो- ।
५. A : -न्तरं । ६. -पेक्षोप्रतो ।
७. A : यदैव- ।

ब्राह्मो वायं स्वप्रकाशोऽव्ययात्मा
स्वाकारस्थं ब्रह्म तत् प्राह येन ।
तस्माज्जाता येऽपि वर्णास्तथान्ये
तेऽपि स्वार्थं प्राहुरेवं यथायम् ॥ ३३ ।
नादः सोऽयं सर्ववर्णान्तरात्मा
प्रादुर्भूतो ब्रह्मणः सर्वहेतोः ।
यद् यत् कार्यं व्यापकात् संबभूव
तत् तत् सर्वं नामभिर्व्याप्य सोऽपि ॥ ३४ ।
व्याप्यैर्भावैः स्थगितं ब्रह्म यद्वा
भावाश्चैते तद् विना नैव भान्ति ।
तद्वद् वर्णैः स्थगितं नादरूपं
नादं विना न च तेऽपि स्फुरन्ति ॥ ३५ ।
शक्तिः सेयं[1] वैष्णवी घोररूपा
यस्याः पातान्मोक्षिणो यान्ति मोक्षम् ।
अस्यां युक्ताः कल्पनापाशमुक्ताः
स्वात्मारामा यान्ति चिन्तामचिन्त्याम्[2] ॥३६।
[3]मध्यमे गगनमध्यधिष्ठिता
ब्रह्मणस्त्वियमुदेति रूपिणी ।
शब्दशक्तिरिह जीवसंज्ञया
सर्वभावविलयादनन्तरम् ॥ ३७ ।
सर्वशब्दमयमात्मनो वपु-
र्यो विवेचयति कारणाद् धृतम्[4] ।
तद्वदुच्चरति तन्मुखाद् वच-
स्तत् तदेति तनुसर्गमन्त्रताम् ॥ ३८ ।

---

१. A । सो- ।
२. A । चिन्त्यम् ।
३. A । मध्यमं ।
४. A । कारणादृतम् ।

ॐ स्वरूपमिह यत् प्रदर्शितं
सर्वमेव [1]तदकारसंश्रितम् ।
तद्धि सर्वजगतः [2]प्रवर्तकं
तत्स्वरूपरहितं प्रकाश्यते ॥ ३९ ।

भासते स्वयं वाग्वपुः[3] स्वकं
यन्न कर्तृ न च कर्म कस्यचित् ।
हलन्तं[4] भवति तत्प्रकाशकं
कर्तृकर्मकरणादिसंश्रयात् ॥ ४० ।

ॐकल्पमुभयरूपसंगमाद्
वर्तते सकलसंसृतिस्थितिः ।
तद्वियोगकरणेन धीमतां
जायते निखिलबन्धमुक्तता ॥ ४१ ।

अच्स्वरूपमिह पौरुषं वपु-
स्तत्प्रकाशकसवर्णनिष्ठितम् ।
प्राकृतं यदपि हल्स्वसंज्ञितं
तद् विकारवपुषि प्रतिष्ठितम् ॥ ४२ ।

अच्स्वरूपरहितं वपुर्यदा
हस्य भाति तत एव तत् तदा ।
स्पन्दते तदिह तत्प्रकाशितं
चित्रविश्ववपुषा तदग्रतः ॥ ४३ ।

ह्स्वरूपमुपलीयते यदा
पूर्ववर्णवपुषि प्रभास्वति ।
[5]आभिमुख्यमवलम्ब्य तद्गतं
क्षीणसंसृतिरिहोच्यते तदा ॥ ४४ ।

---

१. A : तदाकार- । २. A : -जगतो प्रवत्तकं । ३. A : चावपुः ।
४. A : हलान्तं । ५. A : अभिमुख्य ।

षोडशार्णकलनादनु तदा
यार्णजातिरपराप्युदेत्यतः ।
सा क्रमेण परिशिष्टदेवता
बीजरूपविधिनैव सार्थका ॥ ४५ ।

अहंकारः [1]सोऽयमिष्टश्चिकित्स्यः
[2]नैतन्मानी प्रतिमुच्यते कश्चित् ।
त्यक्त्वैवैनं सर्वकामैर्विमुक्ताः
शान्तात्मानो ब्रह्मभूयत्वमीयुः ॥ ४६ ।

एतावत्यः कल्पनाः सम्भवन्ति
याः संसृष्टा विश्ववैचित्र्यहेतोः ।
यासां बीजेष्टा हिताः[3] स्था यथार्हं
कामप्राप्त्या वैश्वरूप्यं भजन्ते ॥ ४७ ।

सर्वधर्मपरिवर्जितं यदा
द्रव्यमेति सुधियां दृशः पथि ।
चेतनं भवतु वाप्यचेतनं
मुक्तये भवति तावतैव तत् ॥ ४८ ।

यद् यदत्र परिकल्पशुद्धया
वस्तु किञ्चन दृशा विभाव्यते ।
तत् तदेव भवतो विमुक्तये
ज्ञायते किमुपदेशविस्तरैः ॥ ४९ ।

इति वामनदत्तेन कृतो वर्णविनिश्चयः ।
एतस्य सत्यविज्ञानादहंकारो न बाधते ॥ ५० ।

---

१. A : -ष्ठश्चिकित्स्या ।
२. A : -माली ।
३. A : हिता ।

ममेति[1] च भवेन्मृत्युर्न ममेति तदत्ययः ।
सङ्कल्पमूलममता तन्निषेधे कुतः सृतिः[2] ॥ ४२ ।
ममतापि च सङ्कल्पः सोऽन्यसङ्कल्पकारणम् ।
ज्ञेयः स स्पन्दजो नित्यं स स्पन्दो न विकल्पगः ॥ ४३ ।
न च प्रवेशो दुःसाधस्तत्र ज्ञेयो विचक्षणैः ।
यथा स भगवान् साक्षात् प्रादिशत् तत्र भारते ॥ ४४ ।
समकायशिरोग्रीवं[3] धारणाच्चिन्तनागतिम् ।
यावन्न तत्र संविष्टस्तावन्नास्त्यविचिन्तनम् ॥ ४५ ।
तस्या विचित्रनिर्माणो योऽयं ब्रह्माण्डसंज्ञितः ।
तस्याः पर्वसु विश्रान्ताः सप्तेमे लोकधातवः ॥ ४६ ।
द्वासप्ततिः सहस्राणि नाडीनां यानि तानि सा ।
तिर्यगूर्ध्वमधस्ताच्च चक्रे विपरिवर्तते ॥ ४७ ।
चराचरस्य जगतस्तामाहुर्जननीं पराम् ।
तया यद् यदनुज्ञातं तत् तद् भवति कुत्रचित् ॥ ४८ ।
सर्वस्य[4] च जगत् सर्वं तयात्मनि निवेदितम्[5] ।
तेन येन जनो मा भूदेष क्वापि[6] कुतूहली ॥ ४९ ।
सोत्पत्तिशक्तिः कर्माग्रे हृदये स्थितिसाधनी[7] ।
संहाररूपा भ्रूमध्ये तदूर्ध्वे निर्विशेषणा ॥ ५० ।
य एनां समुपासन्ते शक्तिं संदर्शनेप्सवः ।
तेषां स्वयं समायाति देवी [8]सा हृदयाम्बुजम् ॥ ५१ ।
स्वसङ्कल्पविनिर्माणे विश्वपक्षे कृतालया ।
अन्तर्धनन्ती[9] मधुरं लभ्यते शक्तिषट्पदी ॥ ५२ ।

१. AB : समेति । २. A : कुतो मृतिः । ३. AB : -ग्रीव ।
४. B : सयस्य । ५. B : निवेशितम् : ६. B : क्तापि ।
७. B : -ष्ठिति । ८. AB : नास्ति । ९. B : अन्तर्धनन्ती ।

अनाश्रयस्य सा पत्युर्विहितान्तःपुरं सती ।
हृत्पक्षमध्ये त्वात्मा सा मध्यनाडितया स्थिता ॥ ५३ ।
यदुद्यमननिष्पादी कालः कलयति प्रजाः ।
यास्तयैव भविष्यन्त्यात्मस्वरूपेण संसृताः ॥ ५४ ।
अनभिव्यक्तरूपादिव्यक्तात्मनि वपुः प्रभोः[1] ।
भाविविश्वतया लब्ध्वा सजीवेव सुखं स्थिता ॥ ५५ ।
न केवलं भोक्तृतया तयास्य[2] वपुराहितम्[3] ।
यावच्छरीरमप्यस्य स्वयं भोग्यतयाहितम् ॥ ५६ ।
अत्यन्तरागहृतया न तयात्मनि शेषितम् ।
किञ्चित् स्वतन्त्रं यत्रास्याः पतिभोग्यत्वमागतम् ॥ ५७ ।
येन येन स्वभावेन सास्य देहोपकारिणी ।
तेन तेन स्वरूपेण बहिर्विषयदाप्यसौ ॥ ५८ ।
अन्तर्भवन्त एवास्या लभन्ते परमं प्रभुम्[4] ।
अनन्तरा[5] य एतस्या न लभन्ते कदाचन ॥ ५९ ।
पथारोहक्रमेणैव[6] तत्तद्वैश्वर्यदा भवेत् ।
यावत् सर्वेश्वरमपि प्रयच्छति हृदि स्थितम् ॥ ६० ।
अटवी[7] ब्रह्म नाडीति समा सापि च पिङ्गला ।
चराचरस्य लोकस्य मध्यमा मध्ययोगतः ॥ ६१ ।
आभाति[8] वसते[9] यावद् भानुमण्डलमध्यगा ।
वर्तते कालकर्मात्मविद्यारूपस्वरूपिणी ॥ ६२ ।
तदन्या द्वारसंरोधे यस्तदाकाशगोचरः ।
लभते स परं स्थानं[10] यतो भूयो न संसृतिः ॥ ६३ ।

---

१. B : प्रभो । २. B : तथा । ३. B : वपुरहितम् ।
४. A : विभुम् । ५. A : रज्ञा, B : गज्ञा च । ६. B : पर्वाग्रहे ।
७ A : अचरी । ८. AB : आभोगि । ९. B : वमते ।
१०. B : ष्यानं ।

तस्या यः कर्मदेशस्थो भागो [1]रोमानुसंज्ञितः ।
[2]स वासुदेवस्यावासस्तत्र तं चिन्तयेदजम् ॥ ६४ ।

अनादिनिधने देवे[3] विश्वस्य प्रभवाप्ययम् ।
ज्ञानक्रियेच्छाशक्तीनां कारणं निर्गुणं विभुम् ॥ ६५ ।

ज्ञानशक्तेरधिष्ठाता[4] तदूर्ध्वे चतुरङ्गुले ।
ध्येयः संकर्षणो देवो नाभिमण्डलमध्यगः ॥ ६६ ।

तदूर्ध्वमेतावत्येव क्रियाशक्तेरपि प्रभुः ।
प्रद्युम्ननाम मध्ये यो स[5] ईष्टे सर्वधातुषु ॥ ६७ ।

एतावत्येव तु पुनः प्रदेशे पृष्ठवर्तिनि ।
ध्येयोऽनिरुद्ध इच्छाया नाथो ब्रह्मसमुद्भवः ॥ ६८ ।

हृदयात् कण्ठदेशान्तं[6] यावत् तत्स्थानमिष्यते ।
प्रभवोऽयं क्रमः प्रोक्त आप्ययोऽयमतः परः ॥ ६९ ।

अनिरुद्धोऽपि यात्येव प्रद्युम्नं मुखमास्थितम् ।
प्रद्युम्नो याति संकर्षं[7] कालज्ञानात्मकं विभुम् ॥ ७० ।

ललाटदेशाधिष्ठानं[8] स चेष्टस्तदुपासकैः ।
स हि[9] सङ्कल्प्य[10] सकलं[11] प्रयाति परमेश्वरम् ॥ ७१ ।

वासुदेवमजं नित्यं परं कारणमव्ययम् ।
सर्वमूर्ध्नि स्थितं देवं सर्वव्यापिनमुत्तमम् ॥ ७२ ।

कालः पचति भूतानि सर्वाण्येव महात्मना ।
कालः पक्वो [12]यमं त्वेति यस्तं वेद स वेदवित् ॥ ७३ ।

---

१. B : -देस्याभामोसेमोत । २. B : सर्वा । ३. A : -निधनं देवं ।
४. B : -धिष्टाता । ५. AB : य । ६. B : -देशान्ते ।
७. B : संकर्षे । ८. AB : -धिष्ठानं । ९. AB : नास्ति ।
१०. B : संकलप्य । ११. AB : सकले । १२. AB : यमत्येति ।

तस्येयं कल्पनाद्या यत्[1] कन्दे[2] मूर्ध्नि हृदि स्थितिः ।
सर्वात्मनोऽन्यथा[3] तस्य कः स्थाने नियमक्रमः ॥ ७४ ।

ततः समुत्थिता भावाः प्रतियान्ति तमेव च ।
एतावत्येव [4]कर्तव्ये [5]प्रतिपत्तुरयं क्रमः ॥ ७५ ।

इति सर्वज्ञताज्ञप्त्यै[6] सर्वज्ञैः सम्प्रदर्शितः ।
न चायमेव नियमः किन्त्वयं योग्यताश्रयः ॥ ७६ ।

व्यवहारो न कर्तव्यः[7] [8]क्वचिद् दृष्टमतोऽन्यथा ।
तथाप्येके हि मन्यन्ते [9]धारणामिन्द्रियैः सह ॥ ७७ ।

हृद्येवैति ततोऽप्यन्यदूह्यमागमपण्डितैः[10] ।
तथाद्युक्तं[11] मद्दुहित्र्या[12] वामदेव्या हरिस्तुतौ ॥७८ ।

उपासानियमाभावो [13]ह्यविकारसमाश्रयात् ।
सर्वाङ्गं सर्वतो देवं त्वां मत्वा सर्वसंस्थितम् ॥ ७९ ।

उपासानियमो नेष्टः कैश्चिदुद्दामचेष्टितैः ।
आगमेऽपि[14] पुनः प्रोक्तं नियमाभावसूचकम् ॥ ८० ।

विकल्पशमनाच्छास्त्रमिच्छत्याप्तिं परात्मनः ।
येन येन लघूभूतं मनः शाम्येदयत्नतः ॥ ८१ ।

सहेन्द्रियैः सह प्राणैस्तत् तदेवाचरेत् ततः ।
यथा महाह्रदः क्षुब्ध[15] आत्मन्येव प्रसीदति ॥ ८२ ।

तथा विद्वान् धृतप्रज्ञ आत्मन्येव प्रसीदति[16] ।
आत्मप्रसादप्राप्त्यर्थं यतन्ते[17] सर्व आगमाः ॥ ८३ ।

---

१. A : -स्तु । २. B : कर्मे । ३. B : -त्मता ।
४. AB : हर्तव्ये । ५. B : प्रतिपन्ने । ६. B : -ज्ञप्तै ।
७. AB : गन्तव्य । ८. AB : कश्चिद् । ९. AB : धारणम् ।
१०. AB : -वह्यम- । ११. AB : ह्युक्तं । १२. A : दुहित्रा ।
१३. A : -धिकारि- । १४. B : अगमे । १५ B : वस ।
१६. B : इयं पङ्क्तिर्नास्ति । १७. B : येन ते ।

आत्मा च भगवान् देवो वासुदेवः परो मतः ।
[1]गुणप्रथनयोगाभ्यां सेवित्वा ते मुमुक्षवः ॥ ८४ ।

प्राप्नुवन्ति[2] परं धाम यतो भूयो न सम्भवः ।
स संकर्षणश्च प्रद्युम्नः[3] सोऽनिरुद्धः प्रकीर्तितः ॥ ८५ ।

तत्र प्राप्तस्य वेद्मीति नास्ति संकल्पसम्भवः ।
यत्प्रकाशैकनिष्ठं[4] हि तत् पदं परमेष्ठिनः ॥ ८६ ।

वेद्मीति प्रत्ययाद् विद्वान् न वेद्मीति तदत्ययः ।
[5]स त्वात्मानं न जानाति स हि ज्ञानमयो यतः ॥ ८७ ।

तद् वेत्ति विद्वांस्तद् वेद्यं नातोऽन्यद् वाग्मिता सताम् ।
यदीदमस्ति नो चेत् [6]तत् तदेव प्रथते स्वयम् ॥ ८८ ।

एतावद्विभिवा विद्या विज्ञेया हेयताकृतेः[7] ।
अङ्गीकृत्यापि विषयं तत्तत्त्वज्ञो न मुह्यति ॥ ८९ ।

तत्स्वरूपपरिज्ञानमिन्द्रियेष्वेव निष्ठितम् ।
तेनेन्द्रियाश्रयेष्वेव धारणासु विधिः स्मृतः ॥ ९० ।

एताव × × × ×
× × × ×
× × × ×
स्वेनात्मना सकलकल्पनिराकृतेन[8] ॥ ९१ ।

---

१. AB : -प्रधान- ।
२. B : प्रामुवन्ति ।
३. AB : संकर्षणप्रद्युम्नौ ।
४. AB : निष्टं ।
५. AB : न ।
६. AB : सत् ।
७. AB : -ाकृते ।
८. A : निाकृतेन ।

[1]संकल्पसंततिनिवृत्तिरुपेति साम्यात्
साम्यं तथा हृदयपक्षसमाश्रयेण ।
मध्ये निधाय कमलस्य च चित्स्वरूपं
स्वं तत्त्वमेति विमलं कलनाविमुक्तः ॥ ९२ ।

नायं जिघृक्षति यदा किमपीह वस्तु
नो वा जहाति न चिकीर्षति किञ्चिदेव ।
विद्वेषदोषपरिवर्जितचित्तवृत्तिः
साम्यात् स्वरूपमुपयाति निवृत्तबन्धः ॥ ९३ ।

नायं यदा भवति [2]मेघनिषण्णचित्तो
नो वा [3]बुभूषुरपि तत्सकलात्मवृत्त्या ।
नो मध्यमामपि दृशं प्रतियाति यत्नात्
तत्त्वं तदा समुपयात्यखिलस्वरूपम् ॥ ९४ ।

तत्त्वं यदा निजमवेत्य[4] विरुद्धवृत्तिः
सर्वेण सर्वरचितं रहितं च सर्वैः ।
आकाशकल्पमथवा चलसिन्धुतुल्यः
[5]स्वं रूपमेति हि तदा परिशुद्धबुद्धिः ॥ ९५ ।

सर्वत्र साम्यमुपयाति यदा स्वदेहे
नाधिक्यमेति हृदये न च कण्ठमूर्ध्नोः ।
संविद् विचारशिथिला बहिरन्तरस्य
[6]प्राप्तं तदा भवति [7]रूपमिदं पुराणम् ॥ ९६ ।

---

१. A : सकल्प- । २. A : मेध । ३. A : वायुभूष- ।
४. A : निजमेवैत्य । ५. A : स्वे । ६. A : प्राप्तस् ।
७. A : रूपमयं ।

[1]भेदं न वेत्ति जडचेतनयोर्यदैव
न स्पन्दते हृदयसद्मनि[2] मध्यसंस्थः ।
भारूपमात्रपरिशेषितसर्वभावः
प्राप्तं तदा भवति [3]रूपमिदं पुराणम् ॥ ९७ ।

एकायने प्रसूतस्य कश्मीरेषु द्विजात्मनः[4] ।
कृतिर्वामनदत्तस्य सेयं विद्यासमाश्रया ॥ ९८ ।

॥ इति विद्याविवेको नाम चतुर्थं प्रकरणम् ॥

१. A : भेदेन । २. A : -पद्मनि । ३. A : रूपमयं ।
४. A : द्विजत्मनः ।

अथ पञ्चमं प्रकरणम्

देशकालगुणकार्यद्वारगं
सर्वतः सममनीशमीश्वरम् ।
[1]आमनोनियमशब्दगोचरं
सर्वशब्दविषयं च नौमि तम् ॥ १ ।

त्यागसंग्रहविधानुपासिभिः
सर्वतः समतया समाश्रितैः ।
सर्वभूतगुणकार्यवर्जितै-
र्भूयते ध्रुवमज त्वदात्मता ॥ २ ।

नैव तत् क्वचन किं च यन्न तत्
त्वद् विना ननु किमर्थमीशषे ।
स्वात्मनः प्रभुरतोऽपि सन्मतः
स्वप्रभापरिकरः सुदर्शनः ॥ ३ ।

सर्वशक्तिपरिवारदृश्यया[2]
यः श्रिया भुवनपद्मसंस्थया ।
सेव्यते बहुविधं त्रिभेदया
नौमि तं परमकारणं हरिम् ॥ ४ ।

मध्यमाभिमतमध्यखेचरः
कण्ठमूलधरणान्त उत्पतन् ।
[3]प्राप्यसे प्रणवपाशवेष्टितो
योगिशाकुनिकदृष्टिगोचरः ॥ ५ ।

---

१. A ; आमन- । २. A : -दृश्या । ३. A : प्राप्य मे ।

विबुधवरवरिष्ठं[1] पूजितं पूजनीयै-
स्त्रिभुवनवरमीडे[2] संस्तुतं संस्तवार्हैः ।
अधिगतजनदोषं पाप्मनश्चित्रभानुं
भवभयभिदमेकं केशवं संश्रयेऽहम् ॥ ५१ ।

एकायने [3]प्रसूतस्य कश्मीरेषु द्विजन्मनः ।
कृतिर्वामनदत्तस्य सेयं वर्णसमाश्रया ॥ ५२ ।

॥ इति वर्णविकारो नाम पञ्चमं प्रकरणम्[4] ॥

१. A : -वरिष्ट ।
२. A : -मिहे ।
३. A : प्रस्तूतस्य ।
४. A : श्लोकाः ५२ ।

अथ षष्ठं प्रकरणम्

प्रणम्य परमात्मानं[1] तन्मण्डलविधिक्रियाम् ।
तद्भक्तेषूपदेक्ष्यामि यथान्यायं यथागमम् ॥ १ ।

नित्यप्रबुद्धरूपाय बाह्यान्तरनुमोदिने[2] ।
अगृहीतविकल्पाय स्वभावगुरवे नमः ॥ २ ।

रत्नानि नोपयुज्यन्ते न धनानि न चापि[3] भूः ।
न चापि पशवो यत्र न मन्त्रो न बलेः क्रिया ॥ ३ ।

न मुद्रा न जपध्याने नाधिवासो न चार्चनम् ।
नापि[4] शुद्धिर्न दाहादिविधिरावाहसम्भवः ॥ ४ ।

भूमिरापोऽनलो वायुः खं मनो धीरहंकृतिः ।
अयत्नसिद्धे हृत्पद्मे दलैरेभिर्विभूषिते ॥ ५ ।

कालचक्रसमाविष्टे कर्णिकायां स्थितः प्रभुः ।
साधकैः प्रार्थ्यते देवो यः स्थितः परमेश्वरः ॥ ६ ।

सदा स्वात्मेन्द्रियैः शुद्धैः प्राणप्रलयकल्पितैः ।
[5]अच्छिन्नैर्नित्यमेवैभिर्दिवारात्रमतन्द्रितैः ॥ ७ ।

[6]चक्रारविन्द नाभ्यस्मिन् मण्डले धातृनिर्मिते ।
अविच्छिन्नप्रवाहेण दीक्षितैः सर्वतः समैः ॥ ८ ।

[7]केवलं विस्मृतेर्लेपादवलेपादयं क्रमः ।
[8]कुर्वती तद्रसाक्षेपा[9] तत्र बोध्या बुधैरसौ ॥ ९ ।

---

१. A : -त्मने । २. A : -नुमोदने । ३. A : घ × जि ।
४ A : नाध्य । ५. A : नित्मेरच्च । ६. A : -रवि ।
७. A ; -लेपाम । ८. A : कुर्वानो । ९. A : तद्रमाक्षेपां ।

यत्क्रियाकारिणस्ते स्युस्तां क्रियामात्मसंगताम् ।
[1]मन्वानाः प्रविमुच्यन्ते बध्यन्ते पुनरन्यथा ॥ १० ।

तथा च बोधितः साक्षात् परमेशेन पाण्डवः ।
वचसा यत् करोषीति तत् कुरुष्व मदर्पणम् ॥ ११ ।

एवं बुद्ध्वा वर्तमानो याः [2]सिद्धीरभिवाञ्छति ।
अयत्नेनैव ताः सर्वाः [3]सम्प्राप्यन्तेऽणिमादयः ॥ १२ ।

अप्रमेयप्रभावो हि यस्य राजा वशे स्थितः ।
भवन्ति वशगास्तस्य सर्वे तदनुचारिणः ॥ १३ ।

तथा हि राजा यो यस्मिन् विनियुक्तो भवेत् पदे ।
तत्र शमस्थराजोऽसौ भवेत् तत्प्रार्थितप्रदः ॥ १४ ।

शरीरारम्भिका एवं भूताधिष्ठातृदेवताः ।
तां तां भूमिमवाप्तस्य देवस्य स्वसमृद्धिदाः ॥ १५ ।

केवलं तत्र संरोधमर्थयन्तेऽस्य ताः पुनः ।
अनादृत्य प्रणीतस्य[4] न्यग्भवन्ति स्वभूमिषु ॥ १६ ।

गन्धक्षेत्रादिषु भृतो यावत् प्राप्तो न पिङ्गलाम् ।
तावत् सेच्छास्तदास्येच्छामनुधावन्ति देवताः ॥ १७ ।

मध्यमान्तःप्रविष्टस्य प्राप्तस्य स्वपदं प्रभोः ।
आशिषः प्रविलीयन्ते परिपूर्णस्य सर्वतः ॥ १८ ।

यथा च राजधानीस्थे न एते[5] न करप्रदाः ।
[6]करान् [7]समुपवाञ्छन्ति यथा विषयवासिनि ॥ १९ ।

---

१. A : मन्वानः । २. A : सिद्धा यो । ३ A : स्तम्पायोत्य ।
४. A : -प्रणतस्य । ५. A : एता । ६. A : कराद् ।
७. AB : समुपवंच्छति ।

अथवास्यानवच्छिन्ना तदा भूतिः प्रवर्तते ।
निरुध्यते यदा नायं मितैर्विषयवासिभिः ॥ २० ।

तथा च पतञ्जलिना निर्दिष्टो धारणाक्रमः[1] ।
प्रदेशवती येनैषां जायते ऋद्धिसम्भवः ॥ २१ ।

ऋद्धयो भूतसंभूतास्तेषु यातेषु वश्यताम् ।
अर्थादेव प्रवर्तन्ते कस्तासामुपरि ग्रहः ॥ २२ ।

तस्मात् प्रयत्न आस्थेय आत्मतत्त्वावलोकने ।
नह्यनात्मविदः[2] क्वापि कदाचिदपि भाजनम् ॥ २३ ।

अनात्मनः परित्यागादात्मनः प्राप्तिरिष्यते ।
न तु भिन्नस्य तस्याप्तिर्ज्ञेया ग्रामघटादिवत् ॥ २४ ।

मन्त्रः सदोदितो नादो मुद्रा या काचिदास्थितिः ।
ध्यानं सार्वत्रिकी[3] दृष्टिर्जपो यद् यत् प्रभाषणम् ॥ २५ ।

केवलं सर्वकार्येषु न चेदात्मनि विस्मृतिः ।
सर्वकर्मफलावाप्तिर्भवेदेवं विजानतः ॥ २६ ।

यस्माद् वामनदत्तस्य परमार्थप्रकाशनात् ।
प्रीयतां पुण्डरीकाक्षः परमात्मा सनातनः ॥ २७ ।

॥ इति परमार्थप्रकाशो नाम षष्ठं प्रकरणम्[4] ॥

---

१. A : धारणक्रमः । २. A : नह्यतात्सविदः ।
३. A : सर्वन्निकी । ४. A : श्लोकाः २७ ।

अथ सप्तमं प्रकरणम्

यतः सर्वाणि भूतानि प्रजायन्ते युगागमे ।
यस्मिंश्च प्रलयं यान्ति नमस्तस्मै महात्मने ॥ १ ।

[1]यज्ञानां जपयज्ञोऽस्मीत्येतद् गीतासु यच्छ्रुतम् ।
सर्वक्रियाविशेषेण तदेतदिह चर्च्यते ॥ २ ।

परात् सूक्ष्माद् व्यापकाद् वाऽप्यनिर्देश्यात् [2]स्वयंभुवः ।
जायते[3] प्रथमं शक्तिः परा वाग् विश्वकारणम् ॥ ३ ।

प्रणवात्मा प्राणहेतुस्त्रिरूपा त्रिषु कारणम् ।
यावत् संभवसंकल्पकवलीकृतविग्रहा ॥ ४ ।

यस्तस्याः प्रथमावेशः सा सूक्ष्मा कालसंस्थितिः ।
यस्याः संवत्सरे[4] निष्ठा या[5] वायं देशसन्निधिः ॥ ५ ।

कालपर्यवसानैव देशसंस्थितिरिष्यते ।
स्वरूपान्नातिरिच्येते देशकालौ परस्परम् ॥ ६ ।

कालो द्वादशमासानां[6] ज्ञातः संक्रमणाद् रवेः ।
[7]सर्वस्वदेशः स्वान्तस्थः[8] सर्व एव तदाश्रयः ॥ ७ ।

सोऽपि द्वादशभागात् स बुद्ध्यादीन्द्रिययोगतः ।
[9]चिदा ..... ॥ ८ ।

---

१. A : यज्ञानो । २. A : व्यनिवेश्यात् । ३. A : ज्ञायते ।
४. A : संवत्सगे ५. A : य ६. A : -मासाता ।
७. A : सर्वस्थ । ८. A : स्वादेम्नः ।
९. एतावतोंऽशस्यैव मातृकासु समुपलम्भात् प्रकरणस्यास्य नामादिकं न विज्ञायत इति विज्ञापयति सम्पादको वागीशः शास्त्री ।

सुसङ्ग्राह्याणि अस्मत्प्रकाशनानि

१. **अद्वैतमकरन्दः**—श्रीलक्ष्मीधरकविप्रणीतमिदं ग्रन्थरत्नं 'पण्डितपरिक्रमायाः' चतुर्थस्तबकरूपेण श्रीस्वयंप्रकाशयतिप्रणीत्या 'रसाभिव्यञ्जिका'व्याख्यया, अथ च श्री ए० ई० गफप्रणीतेन आङ्ग्लभाषानुवादेन समलङ्कृत्य प्रकाशितम्—१००—००

२. **वेदान्तकौस्तुभप्रभा**—श्रीमत्केशवकाश्मीरिभट्टविरचितोऽयं ग्रन्थः 'पण्डित-परिक्रमायाः' षष्ठस्तबकरूपेण सुसम्पाद्य प्रकाशितः— ३००—००

३. **ईश-केनोपनिषदौ**—ग्रन्थोऽयं पण्डितक्षेत्रेशचन्द्रचट्टोपाध्यायकृताङ्ग्लभाषानुवादेन समलङ्कृत्य 'पण्डितपरिक्रमायाः' सप्तमस्तबकरूपेण प्रकाशितः— ५०—००

४. **तत्त्वमुक्तावली**—गौडपूर्णानन्दचक्रवर्तिविरचितमिदं ग्रन्थरत्नं 'पण्डितपरिक्रमायाः' पञ्चमस्तबकरूपेण श्री ई० बी० कावेलमहोदयकृताङ्ग्लभाषानुवादेन समलङ्कृत्य प्रकाशितम्— ५०—००

५. **शब्दार्थमीमांसा**—व्याकरणशास्त्रस्यापूर्वोऽयं ग्रन्थो बहुशास्त्रमर्मज्ञैः डॉ० गौरीनाथशास्त्रिमहोदयैः स्वोपज्ञतया प्रणीतः— १००—००

६. **काशीखण्डः (द्वितीयो भागः)**—महर्षिव्यासप्रणीतः स्कन्दपुराणान्तर्गतोऽयं ग्रन्थ आचार्यश्रीरामानन्दकृतया **'रामानन्दी'**-संस्कृतव्याख्यया, अथ च पण्डित-श्रीनारायणपतित्रिपाठिकृतया **'नारायणी'**-हिन्दीव्याख्यया च समलङ्कृत्य प्रकाशितः— २००—००

७. **व्याकरणशास्त्रे लौकिकन्यायानामुपयोगः**—ग्रन्थोऽयं व्याकरणशास्त्रमर्मज्ञैः डा० रामकिशोरशुक्लमहोदयैः प्रणीतः— ८०—००

८. **वास्तुसौख्यम्**—श्रीदेवदत्तमल्लविरचितं ज्यौतिषशास्त्रस्य वास्तुसम्बन्धिग्रन्थमिदं आचार्यश्रीकमलाकान्तशुक्लकृतया हिन्दी-व्याख्यया समलङ्कृत्य प्रकाशितम्—१२०—००

९. **सुन्दरीमहोदयः**—श्रीशङ्करानन्दनाथप्रणीतस्तन्त्रशास्त्रस्यापूर्वोऽयं ग्रन्थः पाठ-भेदानालोच्य सर्वप्रथमं सुसम्पाद्य प्रकाशितः— १५०—००

१०. **त्रिकदर्शनम्**—ग्रन्थोऽयं बहुशास्त्रमर्मज्ञैः प्रो० रामचन्द्रद्विवेदिमहोदयैः स्वोपज्ञ-तया प्रणीतः— १००—००

११. **श्रीस्वच्छन्दतन्त्रम्**—तन्त्रशास्त्रस्याधारभूतमिदं ग्रन्थरत्नं महामाहेश्वराचार्य-श्रीक्षेमराजकृतोद्द्योताख्यविवरणोपेतं सत् प्रकाशितम्—

प्रथमो भागः	१००—००	द्वितीयो भागः	५०—००
तृतीयो भागः	५०—००	चतुर्थो भागः	६०—००
		पञ्चमो भागः	५०—००

१२. **श्रीतन्त्रालोकः**—ग्रन्थोऽयं महामाहेश्वराचार्यश्रीमदभिनवगुप्तविरचितः। अशेषागमोपनिषदालोकोऽयं ग्रन्थ आचार्यश्रीजयरथकृतया **'विवेक'**-व्याख्यया, अथ च डॉ० परमहंसमिश्रकृतया **'नीर-क्षीर-विवेक'**हिन्दी-व्याख्यया समलङ्कृत्य प्रकाशितः—

प्रथमो भागः—१२४—००
द्वितीयो भागः— १३२—००

१३. **विरूपाक्षपञ्चाशिका**—ग्रन्थरत्नमिदं श्रीविद्यानन्दचक्रवर्तिकृतविवृत्त्या, अथ च गभीरया भूमिकया समेधितं सत् प्रकाशितम्— १६—००

१४. **साम्बपञ्चाशिका**—श्रीसाम्बप्रणीतोऽयं ग्रन्थो राजानकश्रीक्षेमराजकृत-विवृत्त्या, अथ च गभीरया भूमिकया समलङ्कृत्य प्रकाशितः— १२—००

पत्रव्यवहारसङ्केतः—प्रकाशनाधिकारी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी—२२१ ००२